- Title – मन्त्रार्थ दीपिका
- Accession No – Title –
- Accession No – 71/142
- Folio No/ Pages –
- Lines-
- Size
- Substance Paper –
- Script Devanagari ✓
- Language – संस्कृत
- Period – 1945 संवत्
- Beginning – ॐ स्वस्ति श्री गणेशाय नमः। अलकं मिलितं कपोलयुगे तिलकं चंदन बिंदुना दधानः दिवसे–
- End – संवत 1945 पौष मासे कृष्ण पक्षे तृतीयां गुरु दिने केशवराम प्रभाकर स्वार्थसिद्धं लिपि कृतं लवपुरे।
- Colophon-
- Illustrations -
- Source -
- Subject - वेद
- Revisor -
- Author - शत्रुघ्न

1. Remarks- अपूर्ण 26–33, 68–69 पृष्ठ अनुपलब्ध

जयकुमार

मं. सु. टी. १

ॐस्वस्तिश्रीगणेशायनमः अलकंमिलितंकपोलमूलेतिलकंचंदनबिंदुनादधानः दिवसेदिवसे
विशेषशालीवनमालीमुदमाततानचित्तेः १ तनावालोलायांभयचकितगोपालतरुणी
दृगंतैरुन्मीलत्कुवलयदलश्रेणिसुभगैः हठादापूर्णायांतपनतनयानीरनिवह
भ्रमेणप्रच्छेत्रंकृतकरपुटोरक्षतुहरिः २ श्रुत्वातातपणंसुदारुणतरंकामाभिरामाकृ
तिर्जानक्यानिभृतातिकातरदृशासाकूतमालोकितः श्रीरामःसपुनातुधूर्जटिधनुर्भंगे
यदंगेभवन् रोमांचस्यमिषेणगुप्तहृदयानंदादमंदांकुराः ३ बभूवराजन्यकुलावतं
सः पुरासुशर्माकिलराजसिंहः विहत्ययोभारतसंयुगेषु चकारभूमीधरभूमिरक्षाम्
४ तदन्ववाये महनीयकीर्त्तिः सुवीरचंद्रः क्षितिपः किलासीत् चकारयःसंयुगय
न्नभूमौ पभूनशेषान्निववैरिवीरान् ५ तस्मादसीमगुणसिंधुरशेषवंधुरासीत्सम १

च्चे:

अवतु सुके

3

स्तजनगीतभुजप्रताप: श्रीदेवकीतनयपादरत: प्रयागचंद्र: प्रजानयनरंजनपूर्णचंद्र: ६
राजाश्रीरामचंद्र: क्षितिपतितिलक: क्षोणिचक्रैकभूषा तस्मादासीच्च दोषांइवजलधे: शोभमा
न: कलाभि: येनक्षोणीधरीयक्षितिपतिनगरे स्थापिताधर्ममार्गा: विद्या: किंचानवद्याद्वि
जवरनिवहा: शिक्षितारक्षिताश्च ७ तेनश्रीधर्मचंद्र: समजनिधरणीपालमूर्द्धन्य
रत्नं यत्नादाराधितश्रीपतिपदकमलध्यानधाराधुरीण: यस्मिन्नायच्छमाने रणशिर
सिधनुर्दण्डमुद्दंडवीर्यैप्रत्यर्थिक्षोणिपाला: क्षणमपिसमरे नासितुंसंक्षमंते ८ आ
देशादथराज्ञस्तस्यश्रीधर्मचंद्रस्य मंत्रार्थदीपिकेयंक्रियते शत्रुघ्नशर्मणासम्य
क् ९ उवटे मंत्रव्याख्याणविज्ञो ब्राह्मणस्य सर्वस्वे वेदविलासिन्यामपि कौशलमी
क्षे तथापि मेसद्भि: १० पूर्वग्रंथेषु याव्याख्यालिख्यतेत्रापि सामया किंतुतेषु दुरू

मं॰प्र॰ दी॰ २

ह् यत्तदत्रातिविशद्यते ११ स्नानमंत्रा स्तथा संध्यामंत्रा देवार्चने तथा श्राद्धमंत्रास्त
तः पश्चात्षडंगशतरुद्रियं १२ वैवाहिकादयो मंत्राव्याख्यास्यंते क्रमादिह उपोद्घा
त प्रसंगान्यांके चिदन्येपि कुत्रचित् १३ तत्रोपोद्घात संगत्या प्रथमं वेदार्थ ज्ञान प्रशंसा
तत्र कूर्मपुराणे नवेदपाठ मात्रेण संतोषं कारयेद्गुरुः पाठ मात्रावसानस्तु पंकेगो
रिवसीदति योधीत्यविधि वद्विप्रो वेदार्थं न विचारयेत् ससान्वयः शूद्रसमः पात्र
तां न प्रपद्यते व्यासः वेदस्याध्ययनं सर्वं धर्मशास्त्रस्य वापि यत् अजानतोर्थं त
त्सर्वं तुषाणां कंडनं यथा तथा यथा पशुर्भार वाही न तस्य भजते फलं द्विजस्तथा
र्थानभिज्ञो न वेद फलमश्नुते पाठमात्ररतान्नित्यं द्विजातीञ्छ्राद्धे वर्जितान् पशू
निं तान्स्त्राज्ञो वाङ्मात्रेणापि नार्चयेत् श्रुतहीनमधीतं यन्नेह नामुत्र तद्भवेत् श्रु २

वच

तं तु केवलमपि समुद्धाराय कल्पते १५ योधीते नार्थतत्वज्ञस्तस्य तद्धारणं वृथा भा
रवाही स मृतकः केवलं क्लेशभाग्भवेत् १६ तस्मादर्थपरिज्ञाने यत्नः कार्यो विजानता
व्यासः ज्ञानं च कर्म संयुक्तं युक्तार्थकथितं मया अधीतं श्रुतसंयुक्तं तथाश्रेष्ठं न केवलं
अधीत्य यत्किंचिदपि वेदार्थाभिगमे रतः स्वर्गलोकमवाप्नोति धर्मानुष्ठानविद्द्विजः॥
मनुः वेदशास्त्रार्थतत्वज्ञो यत्र तत्राश्रमे वसेत् इहैव लोके तिष्ठन्स ब्रह्मलोकाय
कल्पते व्यासः समभ्यस्तं स्तोकमपि श्रुताधीतो विशिष्यते चतुर्णामपि वेदानां
केवलाध्ययनाद्द्विजः अनूचानादृषिनः श्रेष्ठा ग्रंथिभ्यो धारिणो वराः धारिभ्य
श्चार्थतत्वज्ञास्तेभ्योप्यध्यात्मचिंतकाः अथ कातीयस्नानमंत्रव्याख्या ॐ
उरुं हि राजा वरुणश्चकार सूर्याय पंथामन्वेतवा उ अपदे पादाः प्रतिधा

सं॰भा॰ तवेकरुतापवक्ता हृदयाविधश्चित् नमोवरुणायाभिष्ठितोवरुणस्यपाशः १ हि यस्मा
टी॰ ज्जलस्यराजावरुणः सूर्यायसूर्यस्यपंथांकोर्थः पंथानंउरुं विस्तीर्णंचकार कृत।
३ वान् तस्मात्तंपंथानंअहंअन्वेतवैअनुगच्छामीत्यर्थः उपद्योतरे सरावरुणः त
मेवपंथानंअपदेकोर्थः आकाशेसूर्यस्यपादा पादानां रश्मीनांप्रतिधातवे अर्प
णायअकः कृतवान् अः विद्युत्तस्यपदेअपदे उ अपिचसरावरुणः हृदया। २४
विधश्चित् हृदयाविधः पिशुनस्यापिअपवक्ता नियामकः चित् अप्यर्थे तथाच
जलस्यराजापिशुनस्यापिनियामकोवरुणआकाशेसूर्येरश्मीनामर्पणायवि।
स्तीर्णंपंथानंकृतवान् तंपंथानमनुगच्छामीतिवाक्यार्थः अत्रसूर्यायेतिषष्ठ्य
र्थेचतुर्थीपंथामितिपंथानमित्यत्रनकारलोपः छांदसः अन्वेतवै इति इणग ३

तावित्यस्मादनुपूर्वात् कृत्यार्थेतवैकेनेति तवै प्रत्ययः कृन्मेजन्तइत्यव्ययत्वं पदाइ १
तिषष्ठीवहुवचनस्थाने छांदसतादाकारः प्रतिधातवइति प्रतिपूर्वाद्दधातेः रूपं
अकइतिकरोतेर्लङ् प्रथमैकवचनेसिप् प्रत्ययः वहुलं छंदसीति वहुलवचनाद्
इ नभवति धातोर्गुणोरपरत्वं हल्ङ्यादिनाविभक्तिलोपः रेफस्यविसर्गः हृदया
विधइति हृदयमाविध्यतीति क्विप्" नमोवरुणायेति" वरुणायनमः अस्तुकृतः व
रुणस्यजलरूपस्यपाशः अभिष्ठितआक्रांता यतः अयंवाक्यार्थः वरुणस्य
जलरूपपाशाक्रमणेनयाअप्रीतिर्जायतेसावरुणनमस्कारेणापनीयते तेन
वरुणनमस्कारपूर्वकंजलावतरणंक्रियते इति" ये तेशतं वरुण येसहस्रं यज्ञि
या पाशा वितता महांतः तेभिर्नो अद्य सवितोतविष्णुर्विश्वे मुंचंतु मरुतः स्वर्काः॥

म॰ष्व॰ हे वरुण नेते वयेयज्ञिया: यज्ञसंबंधिन: शतं पाशाः सहस्रं च वितता विस्तीर्णा: पाशा:
टी॰ किं भूता: महांत: उत्कृष्टा: तेभि: तेभ्य: अद्य न: अस्मान् सविता त्वं च तु मोचयतु उतस
४ अस्त्वये विष्णुश्च मोचयतु विश्वे विश्ववर्त्तिन: मरुतश्च सुष्टु यथा स्यात् एवं अस्मान् मो
चयंतु ॥१॥ सुमित्रिया न आप ओषधय: संतु दुर्मित्रियास्तस्मै संतु यो स्मान्द्वेष्टि यं च वयं द्वि
ष्म: ॥ आप ओषधयश्च न: अस्माकं सुमित्रिया: साधुमित्रत्वेनावस्थिता: संतु दु
र्मित्रिया इति ता एव तस्मै दुर्मित्रिया: दुष्टमित्रत्वेन वैरित्वेनावस्थिता: संतु तस्मै कस्मै
यो स्मान्द्वेष्टि अर्थात् शत्रु: यं च वयं द्विष्म: अर्थात् शत्रुमेव ॥२॥ इदं विष्णुर्विचक्रमे त्रे
धा निदधे पदं समूढमस्य पांसुरे ॥ इदं जगत् विष्णु: विचक्रमे आक्रांतवान् विष्णु ४

तास्सर्वप्राणिनो हि भूतेंद्रियमनोजीवभावेन विशतीति विष्णुः यद्वा विष्णुर्व्याप्नो विष्णुर्व्यापकः
किंच स त्रेधा पदं निदधे भूम्यंतरिक्षस्वर्लोकेषु अग्निवायुसूर्यरूपेण त्रेधा पदं निहितवा
नित्यर्थः किंच अस्यैव विष्णोः अन्यत्पदांतरं विज्ञानमयानन्दमयमद्वैतमक्षरं इत्येवं ल
क्षणं समूढं अस्य तर्हि तदप्रविज्ञातमिति यावत् अर्थादकृतात्मभिः पांसुरे इति गुणोपममेत
त् तेन पांसुल इव रलयोरेकत्वस्मरणात् यथा पांसुले पांसुमये प्रदेशे निहितमन्यत
द्रव्यांतरं समूढं दर्शनायोग्यं भवतीति तात्पर्यं तदुक्तं तद्विष्णोः परमं पदं सदाध्यायं
ति सूरयः २ दिवीव चक्षुराततमिति आपोस्मान्मातरः शुंधयंतु घृतेन नो घृतप्वः पुनंतु
विश्वं हि रिप्रं प्रवहति देवी उदिदाभ्यः शुचिरापूत एमि आप उच्यंते यणताः आपः
मातरः जगतो निर्मात्र्यः ता अस्मान् शुंधयंतु शोधयंतु किंच नोस्मान्घृतेन पुनं

मंत्रा० तुयज्ञयोग्यंकुर्वंतु किंभूताः आपः घृतप्वः घृतेनपुनंतीति घृतप्वः घृतंहिअपांपरमंतेजः पवित्रं।
दी० च तथाचश्रुतिः तद्वैसुपूतंघृतेनपुनंति इति सुवंति प्राणाघृतप्राशः इति मेध्यानीति गौतमः स्मृति 12
५ पूर्वंहियाज्ञ्याक्रियते इतिस्तौति विश्वमिति हियस्मात् विश्वंसर्वंरिप्रं कोर्थः पापंदेवीदेव्यः भव
त्यः प्रवहंतिमार्जयंति रपोरिप्रमितिपापनामनी इत्युवटः यस्मात्स्वभावत एवसर्वंरिप्रंपापं
प्रकर्षेणनाशयंतिभवंत्यः तस्मादिदमपिपापंनाशयंतीत्यर्थः उदिदाभ्यः इति उदित्यनेनव्य
वहितेनएमीत्यन्वयः तथाच आभ्योद्भ्यः शुचिः सन् आपूतश्च आसमंताद्भावेनपूतश्चसन्
उदेमि उद्गच्छामि इच्छद्वेदोऽनर्थकः मानस्तोक इति इतिव्याख्यानं शतरुद्रियव्याख्यानेद्रष्ट
व्यं॥ इमंमेवरुणश्रुधीहवमद्याचमृडय त्वामवस्युराचके॥ हेवरुण अद्यमेममहवं आह्वानं।
श्रुधिशृणु अस्माश्च आमृडय आसुखय मृडसुखनेकालांतरंनापेक्षणीयमित्यर्थः किंकार।
णं यतस्त्वामहमाचकेकामये आचक इति कांतिकर्मणिकथंभूतः कामयेअवस्युः आत्मनोधनंरक्ष। ५

णां वा इच्छन् अव: रक्षणं धनं च "तत्वायामीत्यादि" इति पदद्वयं ज्ञेय: अथ एतद: अवणात् ऋत्विग्वदति
अहं ब्रह्मणा त्रयीलक्षणेन वेदमान: स्तुवन्सन् यत्प्रयोजनार्थं त्वां यामि उपासयामि तदेवायं यजमा
न: आशास्ते हविर्भिरूपस्थितैः अत: हे वरुण अहेडमान: अक्रुध्यन् इह कर्मणि वर्त्तमान: न: अ 13
स्माकं प्रयोजनं यज्ञसमाप्तिलक्षणं बोधि बुध्यस्व हे उरुशंस बहुशस्तव्य न: आयु: मा प्रमोषी: मा
खंडय "त्वंन इत्यादि" हे अग्ने त्वं न: अस्मान्प्रति वरुणस्य देवस्य हेड: क्रोधं अवयासिसीष्ठा:
अवगमय दूरीकुरु त्वं किंभूत: विद्वान् जानान: क्रोधमिति शेष: अवयासिसीष्ठा इति यसुप्र
यत्ने इत्यस्य णौ तस्यावपूर्वस्य लिङि रूपं यस्मात्त्वं यजिष्ठ: यष्टृतम: वह्नितम: वोढृत
म: अर्थात् हविषां शोशुचान: देदीप्यमानश्च भवति तस्मात्प्रार्थये अस्मत् अस्मत्त:
विश्वा विश्वानि सर्वाणि द्वेषांसि दौर्भाग्यानि प्रमुमुग्धि प्रमोचय "सत्वंन इत्यादि" हे अग्ने
स त्वं एवं प्रार्थ्यमान: न: अस्माकं अवम: अवितृतम: पालयितृतम: भव ऊतीति ऊ

मं॰ धं॰ त्पातर्पणेन गत्या वा नेदिष्ठश्च निकटतमो भव कस्मिन्समये उषसः व्युष्टौ विच्छेदावच्छि 14
दी॰ न्नेकालेऽस्मिन्नेवाहनीत्यभिप्रायः ततः अवयक्ष्व अवगत्य नोऽस्माकं वरुणं यजस्व राणः र
६ममाणः सन् यद्वा रादाने हविराददानः ततो वीहि भक्षय अर्थात् पुरोडाशं किंभूतं पुरोडा
शं मृडीकं सुखकरं ततो नोऽस्माकं सुहवः स्वाह्वानः एधि भव "मापो मौषधीरित्यादि" हे
वरुण ओषधीर्मा हिंसीः अपश्च मा हिंसीः किंच हे राजन्वरुण ततः धाम्नः पाशसमु
च्चितात्स्थानान्नोऽस्मान् मुंच मोचय यतो यतो विभिमः इत्यभिप्रायः [illegible]दाहुरिति
किंच हे वरुण ततस्तस्मादेनसः नोऽस्मान्मुंच मोचय अर्थादेनोवधात् यतो गावः अ आपः
घ्न्या अहिंस्या इति आहुः अर्थाद्वेदस्मृतिलोकवाक्यानि वयं च इत्यनेन प्रकारेण
ताः आपः शपामहे हिंसामः तथा च अहिंस्याः पूजनीयाश्च हिंसामेति तद्धिंसाज
६

नितं पापं नाशयेति वाक्यार्थः उदुत्तममिति उदित्यप्युपसर्गः उतश्रथायेत्यत्र संबध्य
ते हे वरुण अस्मन्नः उदुत्तमं ऊर्ध्वस्थितं तावत् पाशं उत श्रथाय श्लथीकृत्योर्ध्वं नय 15
तथा अधमं च पाशं अवाचीनं अव श्लथय मध्यमं च पाशं विश्लथय अथैवं कृते सति हे आ
दित्य हे अदितेः पुत्र तव व्रते कर्मणि वर्त्तमाना अनागसो अनपराधाः वयं अदितये अदी
नतायै स्यामः भवेमः ॥ "मुंचंतु माशपथ्यादित्यादि" पाशात् मुंचंतु अथानंतरं उ तत्रा
पि च यमस्य यमसंबंधिनः पड्बीशात् बंधनात् मुंचंतु संदानमनर्वंतं पड्बीशमिति दृ
श्यत इत्युवटः किंच सर्वस्मात् देवसंबंधिनः किल्बिषात् पापात् मुंचंतु "अवभृथेत्या
दि" हे अवभृथ यज्ञ यतस्त्वं निचुंपुणः नीचैः क्वणितोसि निचेरुरसि नीचैरवरणोसि तेन
त्वां प्राप्यैव देवकृतमेनः अवयासिषं अहमपनीतवान् देवविषये कृतं देवकृतं कैः स
सह देवैः सह किंच मर्त्यैः मनुष्यैः अथात् ऋत्विग्भिः सह मर्त्यकृतं पापं अवयासिषं म

मं॰ पं॰ र्त्यविषये कृतं मर्त्यकृतं अतस्त्वं हे अवभृथ देव रूषः पाहि देवसंबंधिनः रूषः वधा ~~[illegible]~~ १६
टी॰ त् पाहि रत्त रूषति: हिंसार्थः क्विंत: किंभूता द्वधात् पुरुराव्णः रादाने बहुकालोप ~~[illegible]~~
८ भोगसंतानदातुः अर्थात् संसार लक्षणात् यद्वा रुशब्दे रूवंति प्राणिनो स्मिन्संसारे इति पुरु
रावा तस्मात् पुरुराव्णः संसारादित्यर्थः॥ इदमाप इत्यादि हे आपः इदं पश्चसंबंधि पापं प्रव
हत अपनयत किंच यत् अवद्यं अवदनीयं अभिशापादि तत्र वहत यच्च मलं शरीरसंलग्नं
तत्प्रवहत यच्च अनृतं मिथ्यैव अभिदुद्रोह द्रुग्धवानस्मि अर्थात् परिचरणीयं सेवनीयं यच्च।
अभीरुणं अनपराधिनं अभिशेपे अभिशप्तवानस्मि अपराधी हि विभेति अतो भीरुशब्देनाप
राधी तु उच्यते यद्वा अभिलुनाति छिनत्ति मर्माणि यदुच्चरितं सत्तद्भीरुणं तस्मादेनसः आपः पृ
थक्कुर्वंतु पवमानश्च सोमो वायुर्वा मुंचतु मोचयतु॥ हविष्मतीरिमा इत्यादि इमाः आपः हविष्म
तीः हविषासंयुक्ताः हविष्मान् कोर्थः हविषायुक्तोऽस्ति यजमानः अविवासति परिचरति ८

आविवासतिः परिचर्य्यायांवर्त्तते देवोध्वरोयज्ञोहविष्मानस्तु अद्भिरितिशेषः सूर्योपि हवि
ष्मानस्तु श्रुतिः एतस्मैवैगृह्णाति यएषतपतीत्यभिप्रायः देवीरापइत्यादि हेआपः दे
व्यः अपान्नपात् इतिसंज्ञा वः युष्माकंयः ऊर्मिः जलसंघातः कल्लोलः तंशुक्रयेभ्योदेवेभ्यः
दत्तप्रयच्छत शुक्रशब्द उपलक्षणार्थः शुक्रसोमादिग्रहपितृभ्योदेवेभ्यः इत्यर्थः तेकेये
षांदेवानांयूयंभागः स्थः अंशाः भवथ कल्लोलः किंभूतः हविष्मः यज्ञियः पुनः किंभू
तः इन्द्रियावान् इन्द्रियशब्देनवीर्यमभिधीयते वीर्यवानित्यर्थः छांदसंदीर्घत्वं मदि
तमः मदयितृतमः तर्पयितृतमः पुनः किंभूतः देवत्रा देवान्प्रतियायीदेवमनुष्येत्यादि
नात्राप्रत्ययः कार्षिरसीत्यादि हेआपः त्वंकार्षिरसि अकृष्टमसि कृषविलेखने देवता
याभक्तिभिरितिशेषः तांत्वांसमुद्रस्यजलस्यअक्षित्यैअनुपक्षीणतायै उन्नयामि उद्गृ
ह्णामि आपोवैसमुद्र इतिश्रुतेः किंचहेआपः अद्भिः समग्मतः संगच्छतः ओषधीभिः

मं. पं. दी. ८

व्रीहियवादिभिः सहओषधीः मुद्गमसूरादिकाश्च समगमत तेन ताः सम्यगुत्पद्यं
ते अपांकारणत्वादोषधीनामितिभावः" आपोदेवा मधुमती रित्यादि याआपः दे
वा अगृह्णन् ताः गृह्णामीतिशेषः किंभूताः आपः मधुमतीः स्वादुमतीः पु
नः किंभूताः ऊर्जस्वतीः अन्नवतीः ऊर्जमन्नं पुनः किंभूताः राजस्वः राजानं याः
सुवतेजनयंति ताराजस्वः पुनः किंभूताः चितानाः चेतयमानाः परिदृष्टका
रिणीः किंच याभिः मित्रावरुणौ अभ्यषिंचन् अभिषिक्तवंतो देवाइत्यनुवृत्तिः ३
याभिश्च देवा अत्यरातीः अरातीः शत्रुसेनाः अतीत्य इंद्रं अनयन् नीतवंतः" द्रु
पदादिवेति संध्याप्रकरणे व्याख्यानीयं शंनोदेवीरित्यस्यव्याख्यानं श्राद्धप्रक
रणे द्रष्टव्यं" अपाꣳरसमुद्वयसमित्यादि अपां योरसः सारः वायुः एषवा।

१८

८

पर्वते॰

अपां रसो योयं पैरादइतिश्रुते॰ तं गृह्णामि किंभूतं रसं उद्वयसं उद्गतं वयोन्नं यस्मात् १७
तत् उद्वयसे सूर्ये समाहिते संते किंच अपां रसस्य वायोः योरसः प्रजापतिः हे आपः
वो युष्माकं तमपि गृह्णामि उत्तमं उत्कृष्टं "आपोदेवीरुपसृजेत्यादि प्रक्रमादग्निरु
च्यते हे अग्ने यादेवीः आपः अपः उपसृज उपसृजसि विद्धियसि अर्थात् वृष्टिरु
पाः तासां भूमिगतानां आस्थानात् समीपात् ओषधयः उज्जिहतो उद्गच्छंति किं
भूताः ओषधयः सुपिप्पलाः सुफलाः पिप्पलं फलमुच्यते आपः किंभूताः म
धुमतीः रसवतीः किमर्थं विसृजसि प्रजाभ्यः प्रजानां अयक्ष्माय अयक्ष्मताय
यप्रत्ययलोपः यक्ष्माव्याधिः "पुनंतुमापितर इत्यादि मां मां पितरः पुनंतु प
वित्रं कुर्वंतु किंभूताः सोम्यासः सोमसंपादिनः किंच पितामहाः पुनंतु पवित्रा

20

मं॰ धं॰ दी॰ ८

महाश्च केनपवित्रेण किंभूतेनशतायुषाशतमायुर्यस्मात्तच्छतायुः तेन यज्ञाकारणे
कार्य्योपचारात् पवित्रमेवशतायुः ॥मं॰ पुनंतुमापितामहाइत्यादि तथामामोपि
तामहाः पुनंतु प्रपितामहाश्च पुनंतु आदरार्थोयमभ्यासः विशेषार्थोवा तथाकथं
यथाविश्वंसर्वमांआयुः अहं व्यश्नवै व्याप्नुयामित्यर्थः ॥मं॰ अग्नआयूंषीत्यादि हेअ
ग्नेपवतस्त्वंस्वभावतः आयूंषि यवसेआयुः प्रापकानिकर्माणिचेष्टयसे अतः प्रा
र्थये ऊर्जंदध्याद्युपसेचनं इषंचव्रीह्यादिनोस्माकं आसुव अनुजानीहि एतद्धि
जीवनहेतुरित्यभिप्रायः आरे दूरएवावस्थितं संतं दुच्छुनां दुष्टं श्वानं वाधस्वपी
डितंकुरु श्वनाचात्रदुर्जनप्रभृतयोलक्ष्यंते तैर्रहितः पुरुषः परमायुः प्राप्नोती।

त्यभिप्राय: "पुनंतु मेत्यादि देवजना: देवानुगामिनो जना मा मां पुनंतु मनसा युक्ता धिय: यश्च तु
द्धय: पुनंतु कर्माणि किंच विश्वानि भूतानि च पुनंतु हे जातवेद: अग्ने त्वमपि मा मां पुनीहि "पवित्रेण
पुनीहि मेत्यादि अग्ने मां पवित्रेण पुनीहि किंभूतस्त्वं शुक्रेन शुक्लेन शोचिषा बलेन दीव्यत् दीप्य 21
मान: किंच हे देव क्रत्वा कर्मणा तान् स्मान् क्रतून् यज्ञान् अनु क्रतौ क्रतौ मां पुनीहि "यत्ते पवित्रमित्यादि
हे अग्ने ते तव अर्चिषि अंतरा मध्ये यत्पवित्रं विततं प्रसारितं वर्त्तते तेन पवित्रेण ब्रह्म त्रयीलक्षणं परं
वा पुनातु अग्न्यनुज्ञातेनेति शेष: "पवमान: सो अद्येत्यादि स एव पवमान: सोम: अद्यास्मिन्न
हनि पवित्रेण पुनातु किंभूत: पवमान: विचर्षणि: द्रष्टा कृताकृतप्रत्यवेक्षक इत्यर्थ: यश्चस्व
भावत: पोता रक्षक: वायु: स मां पुनातु "उभाभ्यां देव सवित इत्यादि हे सवित: देव उभाभ्यां विश्व।
त: सर्वत: मां पुनीहि काभ्यां पवित्रेण सवेन च सवेन अनुज्ञया "वैश्वदेवी पुनतीत्यादि वैश्वदेवीसु" ॥४१
सुकुं भीक्रमात् पुनती पावनं कुर्वाणा आगात् कोर्थ: आगता यस्यां इमा बह्व्य: धारा: तन्व: त

मं॰ घ्व॰ नुशरीरं किंभूताधारावीतपृष्ठाः काम्याः काम्यशरीराः काम्यंते हि सुराधाराः तया मदंतः मोदमा
दी॰ नाव्वयं सधमादेषु सहमादनेषु रयीणां धनानां पतयः स्याम सधमादेयस्य यः छंदसीति सहस्यस
१० धादेशः ॥ ४ ॥ चित्पतिर्मा पुनात्विति चित्पतिर्ज्ञानपतिः आत्मा मनो वा मां मां पुनातु अथवा प्रजापतिः प्रजा 22
पतिर्वै चित्पतिरिति श्रुतेः वाक्पतिर्बृहस्पतिर्मा पुनातु पुनः सविता देवश्च मां पुनातु केन अच्छिद्रे
णअनुपहितेन पवित्रेण सूर्यस्य रश्मिभिश्च हे पवित्रपते तस्य पवित्रपूतस्य मम यजमानस्य
तव प्रसवे आज्ञायां वर्त्तमानस्य हे सवितः रात द्रवतु किं यत्कामः अहं आत्मानं पुने पावया
मि तच्छकेयं शकुयां यत्तस्यां तं गच्छामीत्यभिप्रायः ॥ ५ ॥ आयं गौरित्यादि अयमग्निराक्रमीत् रो
ष्वर्येणाक्रांतवान् जगदिति शेषः किंभूतो गौः गेतायास्तु तासु क्रियास्विति शेषः पुनः किंभूतः
पृश्निः नानारूपः असदन्मातरं पुरः पुरः यः अग्निः प्रातरादित्यरूपेण इमां मातरं पृथिवीं पुरः
पुरस्तात् प्राच्यां दिशि असदत् आसीदिति अर्थात् इमं लोकमग्निरूपेणानुगृह्य किंच पितरं च प्र

यँ स्वः पितरं द्युलोकं ब्रह्मलोकं वा प्रयन् सीदतीत्यन्वयः ज्यते स्वः सुखरूपश्चादित्यः इति कातीयस्नानमं
त्रव्याख्या समाप्ता अथ संध्यामंत्रव्याख्या ॥ ऋतं चेत्यादि ॥ अयं च ऋग्वेदीयो मंत्रः अपरश्च तैत्तिरीयः
तत्र रात्रिरजायतेति पाठः समुद्रोर्णव इति च अकल्पयद्दिवमिति च संहिते स च मंत्रो माध्यंदिनीयै
र्न पठनीयः याज्ञवल्क्याज्ञीर्णत्वात् ऋतं सत्यमिति ब्रह्मणो नाम तथा च श्रुतिः स्मृतिश्च ऋतमेका
क्षरं ब्रह्म सत्यं ज्ञानमनंतं ब्रह्मेति तत्राभिद्धादित्यध्याहार्य्यं तेनायमर्थः ऋतं च सत्यं चाभिद्धादिति शेषः
अर्थात् सृष्टिपूर्वकाले तथा च तदानीं केवलं ब्रह्मैवासीदित्यर्थः ततस्तदनंतरं प्रलयावस्थायामेव रात्री
अजायत रात्रिरासीत् रात्रिशब्देनांधकार उच्यते तथा च सकलमंधकारमयमासीदित्यर्थः तेजोभा
वस्यैवांधकारत्वात् रात्रेश्चंद्राधीनत्वेन तदानीमसंभवाच्चेति भावः तथा च स्मृतिः आसीदिदं तमो
भूतमप्रज्ञातमलक्षणमिति ततस्तदनंतरं प्रलयावसाने सृष्ट्यारंभसमये तपसः अध्यृष्टात् समुद्रो
अजायत बभूव तपसः किंभूतात् अभीद्धात् अभिसर्वतो भावेन इद्धात् दीप्तात् सर्वतो लब्धवृ
त्तेरित्यर्थः समुद्रः किंभूतः अर्णवः अर्णः पानीयं तदस्यास्तीति अर्णवः अर्णसः सलोपः

म॰ र्थ॰ दी॰ ११

अ पानीयमयः समुद्रः संजात इत्यर्थः प्रथमतः सकलसंसारसृष्टिनिमित्तं जलराशिरुत्पन्न इत्य
भिप्रायः तथाच स्मृतिः अप एव ससर्जादाविति ततस्तदनंतरं अर्णवात्समुद्रात् अधि पश्चात् धाता 24
विधाता अजायत धाता किंभूतः मिषतः अप्रकटीभवतो विश्वस्य वशी महाप्रलये विलुप्तस्यास्य
विश्वस्य त्रिलोकस्य निर्माणे प्रभुरित्यर्थः स धाता यथापूर्वं यथाक्रमेण सूर्याचंद्रमसावकल्पयत्
निर्मितवान् किंभूतौ सूर्याचंद्रमसौ अहोरात्राणि विदधत् कुर्वाणौ सूर्य एवाहः करोति चंद्र एव रात्रिं
करोतीत्यभिप्रायः ततः सूर्यचंद्रयोरुत्पत्त्यनंतरं संवत्सरोऽजायत समुत्पन्नः सूर्यचन्द्रयोरुत्पत्त्य
नंतरमेव रात्रिदिवसविभागे सति संवत्सरव्यवस्था भवति संवत्सरस्याहोरात्रघटितत्वादित्यर्थः
अथानंतरं दिवं पृथिवीं अंतरिक्षं च स्वश्च एतान् लोकान्स एव धाता यथापूर्वं अकल्पयत् सृष्टवान्
चराचरात्मकसकललोकान्धाता सृष्टवानित्यर्थः अत्र स्वःशब्देन नक्षत्रलोकोपरिस्थस्वर्लोक उ
च्यते द्युशब्देन तदूर्ध्वस्थ महर्लोकादिचतुष्टयमिति हलायुधः तदनेन मंत्रेण सृष्टिस्थितिप्रल
याः प्रतिपादिताः विदधदिति द्विवचने एकवचनं सुपां सुपो भवतीत्यादेः अर्णव इति अर्णस्। ११

श्री

शब्दात् अर्णसोलोपश्चेति वप्रत्ययः सकारलोपश्च अत्रास्मत्संप्रदाये मार्जनं तत्र गायत्री मंत्रः 25
आपोहिष्ठेत्यादिमंत्राः अग्रेव्याख्यातव्याः कृतमितिव्याख्यातं अथप्राणायाममंत्रव्याख्या तत्रप्रथ
मंगायत्रीव्याख्यायते तदन्वयितयापश्चाद्व्याहृतयः तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि।
धियोयोनःप्रचोदयात् १ तत्तस्य भर्गः तेजः धीमहिध्यायेमचिंतयाम अत्रयद्यपितदिति।
पदंभर्गविशेषणंनास्ति तथापि यच्छब्दप्रयोगादेव तच्छब्दप्रयोगो लभ्यते तथाच योगियाज्ञ
वल्क्यः तच्छब्देनतु यच्छब्दोबोद्धव्यः सततंबुधैः उदाहृतेतु यच्छब्दे तच्छब्दः स्यादुदाहृ
तेयुग्म्यच्छब्दे इति तस्यकस्यसवितुः सर्वभावानांप्रसवितुः तथाचयोगियाज्ञवल्क्यः सविता
सर्वभूतानांसर्वभावान्प्रसूयते सवनात्पावनाच्चैव सविता तेनचोच्यते पुनः किंभूतस्य तस्य
देवस्यदीप्तिक्रीडादियुक्तस्य तथाचयोगियाज्ञवल्क्यः दीव्यतेक्रीडतेयस्माद्रोचतेद्योततेदिवि
तस्माद्देवइतिप्रोक्तः स्तूयतेसर्वदेवतैरिति तंकेयोभर्गोनोस्माकंधियः बुद्धीः प्रचोदयात्

26

मं॰र्थ॰ दी॰ १२ प्रेरयति धर्मार्थकाममोक्षेषु अस्मदादीनां बुद्धीः योजयतीत्यर्थः तथाच योगियाज्ञवल्क्यः
चिंतयामो वयं भर्गं धियो यो नः प्रचोदयात् धर्मार्थकाममोक्षेषु बुद्धिवृत्तीः पुनः पुनरि
ति तदिह भर्गशब्देन बहुविधमाहात्म्ययुक्तः सवितृमंडलगतादित्यदेवतास्वरूपः पुरुष उ
च्यते तथाच योगियाज्ञवल्क्यः भृस्जपाके भवेद्धातुः यस्मात्पाचयते त्वसौ भ्राजते दीप्य
ते यस्माज्जगच्चांते हरत्यपि कालाग्निरूपमास्थाय सप्तार्चिः सप्तरश्मिभिः भ्राजते य
त्स्वरूपेण तस्माद्भर्गः स उच्यते अत्र यद्यपि सवितुर्भर्ग इति सवितृभर्गयोर्भिन्नता गायत्री
मंत्रे प्रतीयते तथापि परमार्थचिंतायां सवितृभर्गयोर्भेदो न विद्यते एव स एव सविता
स एव भर्गः सवितृभर्गयोरद्वैतमेव तथाच राहोः शिर इतिवत् षष्ठी पुनः किंभूतं भर्गः
वरेण्यं वरणीयं प्रार्थनीयं जन्ममृत्युदुःखादिनाशाय ध्यानेनोपासनीयमित्यर्थः

तथाच योगियाज्ञवल्क्यः वरेण्यं वरणीयंच जन्मसंसारभीरुभिः आदित्यांतर्गतं यच्चं भर्गाख्यं 27
वामुमुक्षुभिः जन्ममृत्युविनाशाय दुःखस्य विविधस्य ध्यानेन पुरुषो यस्तु द्रष्टव्यः सूर्यमं
डल इति एवं गायत्र्यादित्यस्य माहात्म्यमुपवर्ण्य पुनस्तस्यैव महाप्रभावत्वं सप्तव्याहृतिभिः
विशेषणभूताभिरभिधीयते तद्यथा किंभूतं भर्गः भूरादिव्याप्य व्याप्यातिष्ठतं इति शेषः
तथाच भूरादि सप्तलोकप्रकाशकं भूर्भूमिलोकः भुवः भुवर्लोकः अंतरिक्षं स्वः स्व
र्लोकः महः महर्लोकः जनः जनलोकः तपः तपोलोकः सत्यं सत्यलोकः एवमुपर्युप
रिक्रमेणावस्थितान् सप्तलोकान् अभिव्याप्यावतिष्ठमानो सो भर्ग एतान् सप्तलोकानेव प्रदी
पयन् प्रकाशयतीत्यर्थः यद्वा भूरादीनां भर्गादभेद एव प्रतिपाद्यः सप्तलोकाश्चैताः स
प्तव्याहृतय एवेति पुनः किंभूतं भर्गः आपो ज्योती रसो मृतं ब्रह्म भूर्भुवः स्वरों एतद्रूपमि
त्यर्थः सूर्यश्चेति माकोर्थः मां सूर्यश्च मन्युश्च मन्युपतयश्च रक्षंतां मन्युर्यज्ञः मन्युपतयः

मं.शी. यज्ञपतयः इन्द्रादयः केभ्यो रक्षंतां मन्युकृतेभ्यः पापेभ्यः असांगयज्ञकृतेभ्य इत्यर्थः यद्वा मन्युः क्रोधः
दी. मन्युपतयः क्रोधपतयः इन्द्रियाणि क्रोधकृतेभ्यः पापेभ्यो रक्षंतां क्रोधानुत्पादनात् तथा च
१३ ममैतादृशः क्रोधो मा भवतु येनाहमकार्यं करोमीत्यर्थः किंच यत्पापं मनसा वा बाहुभ्यां प २८
द्भ्यामुदरेण शिश्ना च रात्र्या अकार्षं कृतवानस्मि तत्पापं रात्रिः अवलुंपतु नाशयतु किंच यत्किंचित्
मयि मदाश्रितं अन्यदपि पापं मां तस्माद्रक्षंतां किंच हे आपः तदिदं पापं अहं सूर्ये जुहोमि किंभूते
सूर्ये ज्योतिषि हृदयमध्ये स्थिते प्रकाशरूपे पुनः किंभूते अमृतयोनौ मोक्षकारणे स्वाहा सुहुतं
भवतु अत्र मन्युर्यज्ञे क्रतौ क्रुधीत्यमरः शिश्नेति शिश्नेनेति प्राप्ते छांदसत्वादिनादेशो न भवति। व
"आपः पुनंत्वित्यादि" आपः पृथिवीं पुनंतु पवित्रां कुर्वंतु पृथ्वी अद्भिः पूता सती मां क्षेत्रज्ञं पुनातु।
न केवलं आपः पृथिवीं पुनंतु किंतु ब्रह्मणस्पतिः ब्रह्मणः पतिं ज्ञानस्य पतिं पुनंतु यद्वा वेदस्या
श्रयं परमात्मानमपि पुनंतु तद्ब्रह्मपूता पूतं सन्मां पुनातु अत्र च पृथिवीपदेन पार्थिवो देहो वि

१३

वर्त्तितः ततश्च आपः पृथिवीं पुनंतु मदीयं पार्थिवं देहं पुनंत्वित्यर्थः तथा च देहपावनद्वारा मामापः
पुनंतिति फलितार्थः कुत्रचित्समये यत् उच्छिष्टमपावनं अभोज्यं निंदितभोज्यं दुश्चरितं असदा
चरणं असतामप्रतिग्राह्याणां प्रतिग्रहं च तत्सर्वं तत्र सर्वत्र मामापः पुनंत्वित्यर्थः इत्यमाशास्याः 29
या आपः आचम्यं तेनाः स्वाहा सुहुता भवंतु तथा च आपः आचमनेन मदीयदेहपावनपूर्वकं।
मुच्छिष्टतादिरूपं मां पावयंत्वित्याशंसावाक्यार्थः अत्र ब्रह्मणस्पतिरिति सुपांसुपो भवंतीति द्वि
तीयार्थे प्रथमा पूताइति पूतमित्यत्रार्थे लिंगव्यत्ययेन सर्वमिति सप्तमीस्थाने द्वितीया "अग्नि
श्च मेति" सत्ये ज्योतिषि ब्रह्मणि सूर्ये वा अन्यत्सर्वं सूर्यश्च मेति मंत्रवद्बोधव्यं "आपो हिष्ठा इ।
त्यादि" अग्रेतच्छंदोपादानात् यच्छब्दोध्याहार्य्यः हे आपः याः यूयं मयोभुवः स्थाः मय इति।
सुखनाम सुखभावयित्र्यो भवथ सर्वप्राणिनामिति शेषः हि शब्दो नर्थकः ताः यूयं नोस्मान्
ऊर्जे अन्नाय दधातन स्थापयत यथा वयं सर्वस्यान्नादे भोजका भवेम तथा कुरुतेत्यभिप्रायः

मातर इव वशकान्तौ वशाते: कृतसंप्रसारणस्यैतद्रूपं तथा च यथा पुत्रस्य कल्याणं कामयमाना:

अन्नाधीनमेव सुखमिति भाव: किंच महते रणाय दर्शनाय महद्दर्शनं ब्रह्मदर्शनं चक्षसे व्याख्यानाय

मं॰ धं॰ दी॰ चदधातन चक्षिङ् आख्याने यद्वा महते चक्षसे दर्शनाय रणाय रमणीयाय ब्रह्मदर्शनायेत्यर्थ:। 30

१४ अथ वा हि शब्दो यस्मात् अर्थे हे आप: यस्मात् मयोभुव: स्थ तास्तस्मात् न ऊर्जे दधातनेत्यन्वय:

ता: शब्द: पंचम्यंत: यो वइत्यादि हे आप: यश्च वो युष्माकं शिवतम: कल्याणतमो रस: नो

स्मान् तस्य भाजयत भागिन: कुरुत उशतीरिव मातर: कामयमाना: मातरस्तै स्तै: स्तन्या

मित्यादि दिरसैस्तै भाजयेयु: एवं भाजयत तस्मा अरं हे आप: तस्य च रसस्य पूर्वं कथि...

तस्य व: युष्मत्संबंधिनो अरं अलं पर्याप्ति गमाम गच्छाम अलमिति रलयोरेकत्वस्म।

रणात् यस्य क्षयाय जिन्वथ क्षयायकोर्थ: क्षयस्य यस्य क्षयस्य निवासस्य पंचाहुतिप।

रिणामक्रमेण ब्रह्मादिस्तंबपर्यंतस्य जगत: एकदेशेन जिन्वथ तर्पयथ जिन्वति: प्रीति:

हे आप: तत्र नो स्मान् जनयथ भोक्तृत्वेनेति शेष: "द्रुपदादिवेति" मामां आप: श्र... यं तु शोध

यं तु कृत: एनस: पापात् कथमिव द्रुपदान्मुमुचान: स्विन्न इव स्विन्न: स्वेदवान् आतप इ १४

31

त्यर्थः तथाच द्रुपदात् द्रुपदादिव मुमुचानः बहिर्भवन् आतपः यथा द्रुपदं न स्पृशति त-
था मां पापं न स्पृशतीत्यर्थः स्नातो मलादिव यथा स्नातः मलान्मुक्तो भवति पवित्रेण पूतं आ-
ज्यमिव यथा आज्यं पवित्रेण पूतं भवतीति ऋतं च सत्यं चेति व्याख्यातं "अंतश्चरसीत्यादि
हे आपः भूतेषु तं कोर्थः यूयं अंतश्चरसि चरथ गुहायां विश्वतोमुखः विश्वतो विश्वस्मिन्
मुखं संसरणं यासां ताः विश्वतोमुखाः विश्वतोमुख्य इत्यर्थः त्वं यज्ञः त्वमेव यज्ञः त्वं वषट्कारः त्यः

मं. उद्वयं तमिस्या दि ४६ त्वं ज्योतिः त्वं रसः अमृतं च त्वमेवेति "उत् इत्युपसर्गः अगन्म इत्यनेन क्रियापदेन संबध्यते व-
यं सूर्यं देवं उदगन्म उद्गच्छामः वयं किंभूताः स्वः स्वर्लोकं परि पश्यंतः सर्वतो भावेन पश्यं-
तः स्वः किंभूतं तमसः अप्रकाशरूपात् भूर्लोकादुत्तरं ऊर्ध्वस्थितमित्यर्थः वयं किंभूताः देवत्राः दे-
वेन सूर्येण त्राणं येषां ते देवत्राः सूर्यं किंभूतं ज्योतिः ज्योतिः स्वरूपं पुनः किंभूतं उत्तमं सर्वज्योति-
षामग्न्यादीनामुत्कृष्टं अयमत्र वाक्यार्थः वयं सूर्येण रक्षिता भूर्लोकस्योपरि स्थितं स्वर्लोकं प-
श्यंत स्तमतिक्रम्य परं ज्योतिः स्वरूपे सूर्ये संगता भवाम इति सूर्यप्रार्थना "उदुत्यं जातवेदसमिति उ-
उदुत्यं ४

मं.

त् इत्युपसर्गः वहंतीत्यत्रान्वेति उ शब्दः शोभार्थः त्यमिति त्यद्शब्दस्य प्रयोगः त्यंतं सूर्यं देवं
केतवः रश्मयः उद्वहंति ऊर्ध्वं नयंति सूर्यं किंभूतं जातवेदसं अग्निं तेजोमयं किमर्थमुद्वहंति
विश्वाय विश्वस्य दर्शनाय अयं वाक्यार्थः तेजःस्वरूपं सूर्यं देवं विश्वप्रकाशनार्थं रश्मयः
ऊर्ध्वं वहंतीत्यादित्योत्कीर्तनं कीदृशोसौ सूर्यः इत्याकांक्षायामाह॥ चित्रं देवानामित्यादि॥
असौ सूर्यः चित्रमाश्चर्यं यथा स्यात् एवोदगात् उदितोभवत्सूर्यः किंभूतः मित्रस्य।
वरुणस्य अग्नेः त्रयाणां चक्षुः अक्षि पुनः किंभूतः देवानामनीकं मित्रादिव्यतिरिक्तानाम
मन्येषां समूहः उदितश्च द्यावापृथिवी द्यावापृथिव्यौ अंतरिक्षं च स्वर्गमर्त्याकाशे आप्राः
आपूरितवान्स्वस्य रश्मिजालेनेति शेषः पुनः किंभूतः जगतः जंगमस्य तस्थुषः स्थावर
स्य च आत्मा जंगमस्थावरात्मकसकलसंसारमयो यमेव सूर्य इत्यर्थः आप्रा इति आङ् पूर्व
कस्य प्रापूरणे इत्यस्य लङ् प्रथमैकवचनस्थानेतिङ्तिङोभवंतीति मध्यमपुरुषैकवचनं त

तच्चक्षुः किंभूतमित्याकांक्षायामाह तच्चक्षुरित्यादि तत्पूर्वं चक्षुः कीदृशं देवहितं देवानां समीहितं
कर्तृ पुनः किंभूतं शुक्रं शुक्लं निर्मलं पुनः किंभूतं पुरस्तात्प्राच्यां दिशि उच्चरत् उद्गच्छत् तदेत 33
स्योपस्थानं कृत्वा शरदः वर्षस्य शतं पश्येम एवं शरदः शतं जीवेम शरदः शतं शृणुयाम
शरदः शतं प्रब्रवाम प्रकर्षेण ब्रवाम शरदः शतं अदीनाः उद्धटाः स्याम किंच न केव।
शरदः श तं किंच लं शरदः शतादपि भूयः अधिकं पश्येमेत्यादि सर्वत्रान्वेति तेजोसीति॥ गायत्रीस्तौति त्वं ते
जः असि शुक्रमसि अमृतमसि धाम गृहमसि नाम अभिधानमसि यत् देवानां अनाधृ
ष्टं उत्कृष्टं प्रियं तत्त्वमेवासि देवयजनं देवा इज्यंते अनेनेति देवयजनं मंत्रादि तत्त्वमेवासि।
॥ गायत्र्यसीत्यादि त्वं गायत्री असि गायंतं त्रायते इति गायत्री एकपदी द्विपदी त्रिपदी
चतुष्पदीति स्वरूपकथने अपदसि न पद्यते ज्ञायते गम्यते इत्यपात् एतदेवाह नहि
पद्यसे किंच ते तुरीयपदाय स्वरूपाय ब्रह्मविष्णुशिवभिन्नाय ब्रह्मस्वरूपायेति याव

मं॰ पं॰ दी॰ १६ तु नमोस्त्वितिशेषः यद्वा विराट् हिरण्यगर्भादिकारणोपाधित्रयहीनायज्ञेयायईशपदायय
द्वा वैखरीरूपाय पदाय किंभूताय दर्शिताय दर्शनीयाय ध्यानेनेतिशेषः परोरजसेरजसःप
रभूताय अद्धसत्स्वरूपायेत्यर्थः अथ तर्पणमंत्रस्यव्याख्या उदीरतामित्यादि उत् इत्यु ३५
पसर्गः अपरे एतल्लोकवर्त्तिनः पितरः उदीरतां ऊर्ध्वंक्रामंतां तस्मादपि स्थानाद्विशिष्टतरं
स्थानं गच्छंतु उत्मध्यमाः मध्येभवा मध्यमा येपि मध्यमामध्यमलोकस्थाः तेपि ततोपि
उदीरतां विशिष्टतरं स्थानं गच्छंतु पितरः किंभूताः सोम्यासः सोमसंपादिनः वृकाः तीति वृ
काः नवृका अवृका अहिंसारताः यद्वा अविद्धिन्नसंतानाः इति वा असुं यई युरिति येअसुं
प्राणंवायुं येअन्वीयुः अनुगता वा तात्मान इत्यर्थः ऋतज्ञाः सत्यज्ञानाः स्वाध्यायनिष्ठा यज्ञ
निष्ठा वा ते पितरोपि विशिष्टमुत्कृष्टंस्थानं गच्छंतु एवं स्वकीयेन कर्मणा ये अस्मदीयाः पित
रउन्नतिं प्राप्तास्ते न अस्मान् हवेषु आह्वानेषु अवंतु पालयंतु अंगिरसो न इत्यादि वयं तेषां
१६

पितॄणांसुमतौकल्याणमतौस्यामः मद्विषयेकल्याणीमतिर्भवतित्यर्थः यज्ञियानो यज्ञसं।
पादिनो अपिच भद्रेवंदनीयेसौमनसेकल्याणमनसिस्यामभवेम तेकेयेनः अस्माकंपि।
तरः अंगिरिसः अंगिराऋषिः तस्यापत्यानिबहूनि येचनवग्वानवगतयः पुनः पुनरा
गत्यागच्छंति यद्वानवनीयास्तोत्रव्यागतिर्येषांतेनवग्वाः येचअथर्वाणः अभिचारिण
इतिवाऽथर्वनिश्चरणकर्म भृगवः भृगोरपत्यानिसोम्यासः सोमसंपादिनः॥ आयंतु
नइतित्यादि॥ नः अस्माकंपितरः पितरः आयंतु आगच्छंतु किंभूताः सोम्यासः सोमसं
पादिनः पुनः किंभूताः अग्निष्वात्ताः अग्निनासुयथास्यादेवं आत्ताः भक्षिताः श्रौत
स्मार्त्ताग्निदग्धाइत्यर्थः यद्वाअग्निदग्धाएवोच्यंते तादृशाएवहिश्राद्धयोग्या इत्य
भिप्रायः कैः आयंतु पथिभिर्मार्गैः देवयानैः देवस्ययानंगमनंयत्रतैः देवसमू
हगमनैरिति यावत् देवसमूहयायिनस्तेपितरोयेषांपुत्रपौत्रप्रपौत्रैः एतत्कर्म।

35

ब्रध्नस्यैति सुलोकतामिति। द्वि॰पा॰२।

मं॰ धृ॰ दी॰ १७ क्रियते उक्तं च पुत्रेण लोकं जयति पौत्रेणानन्त्यमश्नुते अथ पुत्रस्य पौत्रेण संप्राप्नोतिति त्रिवि
ष्टपमिति आगत्य च ते पितरः अस्मिन् यज्ञे श्राद्धे स्वधयान्नेन मदंतस्तृप्यंतः परितुष्टाः। 36
संतः अस्मान् अधि ब्रुवंतु अधिकं ब्रुवंतु श्लाघयंत्वित्यर्थः किंच अवंतु रक्षंतु च ऊर्जं वहं
तीत्यादि हे आपः यूयं स्वधास्थ पितॄणामन्नं [illegible] भवथ स्वमात्मानं शरीरं पोषयंती
ति स्वधा धा पोषणे तदपि पितॄणामेव तथा च श्रुतिः स्वधा पितॄणामन्नमिति तेन मे म
म पितॄन् तर्पयत तृप्तान् कुरुत यूयं किंभूताः ऊर्जं वहंतीः ऊर्जं अन्नं वहंत्यः प्राप
यंत्यः ऊर्जं किंभूतं अमृतं घृतं पयः कीलालं परिस्रुतं एतद्रूपमित्यर्थः अमृतं देवा।
नामन्नं घृतं प्रसिद्धं पयो दुग्धं कीलालं पशुः कीलं वेधनं अलं योग्यमस्येति कीलालं
परिस्रुतं स्वधा तथा च यतो नानाविधं अन्नं वहंत्यः स्वधा भवथ तस्मान्मम पि।
तॄन् तर्पयतेति वाक्यार्थः पितृभ्यः स्वधायिभ्य इत्यादि स्वधायिभ्यः पितृभ्यः स्वधा

नमः स्वधास्तु अन्नं अस्त्वित्यर्थः स्वधाप्रतिगमनशीलाः स्वधायिनः सुप्यजातोणिनिस्ताच्छील्ये पितृभ्यइ ३९
ति बहुवचनं पितृबहुत्वसापेक्षं पूर्णतार्थं वा एवं पितामहेभ्यः प्रपितामहेभ्यः स्वधा नमः अत्रापि बहुवच
नं पूर्ववत् किंच अक्षन् अन्नवंतः अदभक्षणे तथाच अन्नवंतः भक्षितवंतः पितरः अमीमदंत मुदि
ताभवंतु मुदिताः पितरः अतीतृपंत तर्पिताभवंतु किंच हे पितरः शुंधध्वं पापप्रक्षालनं कुरुध्वं ये । मं.
वेत्थ । चेह पितर इत्यादि । हे जातवेदः वह्ने तान् पितॄन् त्वं वेत्सि जानासि अतएव अभ्यच्यते स्वधाभिः सवं धैर्हविर्भिः
यज्ञं पितृयज्ञं सुकृतं साधुकृतं जुषस्व सेवस्व ते के ये इह संति अस्मत्समीपे इहलोके वा आसते ये इह नास
ते अन्यत्र संति यान् पितॄन् विद्मः ऽवगच्छामः यांश्च नविद्मः नप्रजानीमः उ कारः पादपूरणे पितॄ ।
न् किंभूतान् यति अविभक्तिको यं निर्देशः यतीन् शुचीन् नित्यनैमित्तिककर्मणा निर्दग्धकल्मषान् ॥
मं. मधुवातेत्यादि । वाता वायवः मधु ऋतायते ऋतायतोउपगच्छंतु वायवो मधु वहंतित्यर्थः सिंधवः
मधु क्षरंतु नद्योमधुमत्योभवंतु ओषधीः ओषध्यः धान्यादयः माध्वीः मधुमय्यः संतु नक्तं रात्रिः म
धु

म॰ पृ॰ टी॰ १८

धु अस्त्विति शेषः मधुमतीर्भवतु उत समुच्चये उषसः प्रातःकाला अपि मधुमया भवंतु पार्थिवं
रजः मधुमदस्तु द्यौः स्वर्गः मधुमानस्तु द्यौः कथंभूता पिता पितेव सर्वस्यानुकूलेत्यर्थः वनस्पतिः
सोमः नः मधुमानस्तु सूर्यश्च नः अस्माकं मधुमानस्तु गावश्च माध्वीः मधुमय्यो भवंतु ऋ
तायते इति ऋगति प्रापणयोरिति धातोर्लेट् प्रत्ययः तिङ्गंतिङो भवंतीति वहुवचने एकवचनं।
द्वारं तीत्या शेसायां लट् माध्वीरिति सुपां सुपो भवंतीति प्रथमायां द्वितीया सर्वमेतन्मधुमयं
भवत्विति आशसायां वाक्यार्थः नमो वः पितरो रसायेत्यादि हे पितरः वः युष्माकं संबंधिभू
ताय रसाय रसप्रधानाय वसंताय नमः वसंते हि मध्वादयो रसा भवंति यद्वा ऋतुरूपतया पि
तर एव नमस्क्रियंते हे पितरो वो युष्मभ्यं रसाय वसंतरूपेभ्यो नमः एवमग्रेपि व्याख्येयं।
यं शोषाय शोषप्रधानाय ग्रीष्माय ग्रीष्मे हि ओषधयः शुष्यंति जीवाय जीवनहेतुभूताय
वर्षाभ्यः स्वधायै पितॄणामन्नहेतुभूताय शरदे शरदि प्रायशो व्रीह्यादिर्भवति घोराय १८

39

हेमंताय हेमंतो हि घोरः शीतप्राचुर्य्यात् मन्यवे शिशिराय मन्युः क्रोधः क्रुद्ध इव शिशिरः ॐ व
धीर्दहति नमो वः पितरः पितर इति आदरार्थे वीप्सा हे पितरो वायुष्मभ्यं नमः नोऽस्मभ्यं
गृहान् दत्त भार्यापुत्रपौत्रादयो गृहशब्देनोच्यंते किंच युष्मत्प्रसादात्तथा भवतु अपि हे पि
तरः गृहे सतः विद्यमानान् द्रव्यादीन् वः युष्मभ्यं देष्म दास्यामः तथा च ताद्दृग्वस्त्रम
म गृहं मा त्यजतु इति आशास्यते" अथ तर्पणोत्तरकर्ममंत्राः ब्रह्मजज्ञानमित्यादि ब्रह्म आ" दि
त्यरूपं पुरस्तात् प्राच्यां दिशि प्रथमं जज्ञानं अजायत इत्यर्थः ततो नंतरं सीमतः मध्यमस्था।
नात् इमान् लोकान् व्याव: विश्राव: व्यावृणोति विवृतान् करोति मध्यस्थानात् किंभू
तात् सुरुचः रोचमानात् यद्वा लोकानित्यस्य विशेषणं सूर्यः किंभूतः वेनः कांतो मेधावी वा
सण्वादित्यः बुध्न्याः उपमा अस्य दिश इति यावत् व्याव इत्यनेनान्वयः बुध्न मंतरिक्षं त।
त्र भवा बुध्न्या उपमीयंते भगवच्चरणेनेत्युपमाः किंच अस्य जगतः विष्ठाः विविध।

मं॰ श्री॰ स्थानेसतः मूर्त्तस्यअसतः अमूर्त्तस्य आकाशादेः योनिंस्थानंचविवः विवृणोति तस्मा
दी॰ दादित्यएवप्रकाशक इतिसूयते॥ इदं विष्णुरिति व्याख्याते॥ नमस्तेइति व्याख्यास्यते॥ आ
१९ कृष्णेने[illegible]तिपूजायां॥ मित्रस्यचर्षणीत्यादि॥ चर्षणीधृतः मनुष्याणांधारणे धिकृतस्य।
मित्रस्यदेवस्यअवः रक्षणंवर्धयन्तुः सुम इतिवाक्यशेषः अवः कीदृशंसानसिंसनातनंपुरा
णं किंचद्युम्नं यशः अन्नंचयाचेमहीतिवाक्यार्थः द्युम्नं किंभूतंचित्रश्रवस्तमं अतिशयेन।
याचय[illegible]नीयं वायुरयूजानिशामनयोः अथवा यस्य एतादृशं अवः द्युम्नंच सः यजमा
मिल नस्याभि[illegible]तंसाधयतु इति इमंमइतिव्याख्याते॥ अदृश्रमस्यकेतवः इत्यादि अस्यसूर्य
स्यरश्मयः अदृश्रंदृश्यन्त इत्यर्थः छांदसंरूपं रश्मयः किंभूताः केतवः ज्ञानजन
काः [illegible]केतुरिति ज्ञाननामसु पवित्रं इत्युवटः वीत्यनर्थकः पुनः किंभूताः जना 40

न् अनुगताः भ्राजंतो दीप्यमानाः कीदृशाः दृश्यंते यथाग्नयः कीदृशाः अयः लोहं अनुगताः भ्राजन्तु ॥ हंसः
शुचिषदित्यादि ॥ सूर्यं स्तौति हंसः सूर्यः हंति गच्छतीति हंसः शुचिषत् शुचौ अग्निमंडले सीदति तिष्ठतीति शुचि
षत् वसुः तेजोरूपः अंतरिक्षे आकाशे सीदतीति अंतरिक्षसत् होता होममंत्रेण देवनामावाहनकर्त्ता । ५१
वेदिषत् यज्ञवेद्यामध्वर्युरूपेण सीदति अतिथिः क्वचिदपि न स्थायी नित्यं भ्रमणशीलः दुरोणसत् दुरोणे
गृहे सीदतीति गृहस्थरूपो ऽयमेवेत्यर्थः नृषत् नृषु मनुष्येषु सीदतीति जीवात्मत्वेनेति शेषः वरसत्
वरेषु उत्कृष्टस्थानेषु स्वर्गादिषु सीदतीति देवत्वेनेत्यर्थः ऋतसत् ऋते सत्ये सीदतीति परमात्मेत्यर्थः
व्योमसत् व्योमांतरिक्षे तत्र सीदति ज्योतिःस्वरूपेण अब्जा अप्सु जायते अग्निस्वरूपेण गोजा गवि पृथि
व्यां जायते जरायुजांडजस्वेदजोद्भिज्जरूपेणेति शेषः ऋतजाः ऋते सत्ये जायते त्रयीरूपेण अद्रिजाः
अद्रौ पर्वते जायते स्फुलिंगरूपेण ऋतं सत्यं सूक्ष्मं बृहत् स्थूलं सर्वव्यापि तया अनवच्छिन्नपरिमाणं ।
इत्यर्थः तथा चायमेव ब्रह्मरूप इति सूर्यस्तुतिः ॥ सवर्चसेत्यादि ॥ वयं वर्चसा ब्रह्मवर्चसेन पयसा

जं॰ =

म॰ यं॰ दी॰ २०

दुग्धेन अर्थात् गोभिस्तनूभिः भार्यापुत्रादिभिः शिवेनकल्याणेन मनसाच समगन्महि संगताभवा 42
मः अर्थात्त्वत्कृपाप्रसादात् किंचसुदत्रः कल्याणदःत्वष्टा मम रायोधनानिविदधातु किंच तन्वः
शरीरस्य यद्विलिष्टं मे दंशितं पापादि तत् अनुमार्ष्टु शोधयतु सएव देवगातुविद इत्यग्रेव्या
ख्यास्यते इति स्नानोत्तरकर्ममंत्रव्याख्या॥ अथ देवपूजामंत्रव्याख्या॥ आकृष्णेनेत्यादि॥ सवि
ता आदित्यः आयाति आगच्छति किंभूतः सविता देवः स्तुतिदीप्तिक्रीडादियुक्तः केन आयाति
रथेनकिंभूतेन हिरण्ययेन सौवर्णेन किंकुर्वन् भुवनानिपश्यन् भुवनवर्त्तिलोकान्पु
ण्यपापकर्तॄन् साक्षिवन्निरीक्षमाण इत्यर्थः नकेवलमेवं किंतु अमृतं देवंमर्त्यं मनु
ष्यंच निवेशयन् स्वेस्वेव्यापारे इतिशेषः मनुष्याहि सूर्योदये यागादिभिर्देवान् प्रीणयं
ति तेच वृष्ट्यादिना मनुष्यान्प्रीणयंति पुनः किंभूतः सविता आवर्त्तमानः पुनःपुनः
स्तमेव देशमागच्छन् केन सह रजसांत्रिकालेन प्रायो रात्रौ रजोगुणबाहुल्येन रजःश २०

द्धेन रात्रिरुच्यते किंभूतेन रजसा कृष्णेन मलिनेन प्रायो रात्रिकाले पुण्यकर्मणामनुत्पादा
त्. रात्रेः कृष्णत्वमुक्तं अयं वाक्यार्थः यः सविता देवः मनुष्यव्यापारस्य स्थापकः यश्च पु
ण्यपापसाक्षी तस्यार्चादिकमुचितमिति अत्र आयातीति व्यवहितेनाऽन्वसंबंधः आवर्त्तमान
इत्यत्रापि छंदसि व्यवहिताश्चेति पाणिनीयसूत्रात् हिरण्यय इति हिरण्मयार्थे निपातः
॥ गणानां त्वेत्यादि ॥ हे ममवसो सर्वस्वभूत त्वां हवामहे आह्वयामः किंभूतं त्वां गणानां मध्ये ग
णपतिं गणाः कूष्मांडादयः पुनः किंभूतं प्रियाणां मध्ये प्रियपतिं निधीनां मध्ये निधिपतिं ।
निधयः पद्मादयः तथाच विघ्नोपशमनाय भार्यादिप्रियलाभाय धनलाभाय च त्वामाह्व
यामः इति वाक्यार्थः अश्वं प्रार्थयंते स्त्रियः आऽहमजानीति हे अश्व त्वामहं गर्भधमाऽऽजा
नि ज्ञातवती अतः हे अश्व त्वं गर्भधमसि गर्भधो भवेत्यर्थः ॥ अंबे अंबिके इत्यादि अंबा अंबिका
अंबालिका एतानि दुर्गानामानि हे अंबे हे अंबिके हे अंबालिके मा मां कश्चन कश्चिदपि न नयु ।

मं.पं. टी. २१

ति नष्वापयति स्वामिसंनिधानमिति शेषः तस्यां च सति अम्बकः पतिः ससस्ति शेते अम्बा
शब्दः पतिवाचकः कुत्सायां कन् किं कृत्वा सुभद्रिकां परिरभ्येति शेषः सुभद्रिकां किं भूतां कां
पीलवासिनीं कांपीलो नगरं तत्र वसतीति कांपीलवासिनी ता कांपीले हि सुरूपाः सुभगा विनी
ताश्च स्त्रियो भवंति अत्रायं वाक्यार्थः अनेन मंत्रेण सौभाग्यकामनया स्त्रिया देवी पूज्यते हे
अंबे इत्यादिना दुर्गा संबोध्य कश्चिदपि मां स्वामिसंनिधिं न नयति तेन मया विना मदीयः
स्वामी अन्यां गृहीत्वा शेते ततो मया पूजिता भवती मां स्वामियुक्तां करोत्विति तात्पर्यं ससस्तीति
सश् स्वापे इति धातो रूपं अग्निं दूतमित्यादि अहं अग्निं पुरोदधे अग्रतः स्थापयामि अग्निं
किं भूतं दूतं देवाह्वानकर्त्तारं पुनः किं भूतं हव्यवाहं हविषो वोढारं तदनंतरं उपब्रुवे उ
पगत्य ब्रवीमि किं इह देवान् आसादयात् इह यज्ञगृहे देवान् आसादयेत्यर्थः विह्मार
राटमसीत्यादि य ज्ञगृहाव यवस्पर्शने विनियोगोस्य मंत्रस्य तत्र ब्राटी स्पृशतिरराः २१

टीवर्त्तिकावंधः तं विष्णोरराटमसि रराटं ललाटं विष्णोः श्नप्त्रे स्तृक्तिणीस्थः येन सीव्यते तं प्रत्याह विष्णोः
स्यूरसि सीव्यतेनेनेति स्यूः ग्रंथिं करोति विष्णोर्ध्रुवोसि ध्रुवः ग्रंथिसमाप्तिः गृहं स्पृशति तं वैष्णवं विष्णु
देवताकमसि अतः त्वा विष्णवे स्पृशामि विष्णुनिमित्तं स्पृशामीत्यर्थः नमः शंभवायेत्यादि शंभवाय 45
शिवाय नमः शंभवत्यस्मादिति शंभवः मयः सुखं भवत्यस्मादिति मयोभवः शं कल्याणं करोती
ति शंकरः मयः सुखं करोतीति मयस्करः शिवाय कल्याणाय शिवतराय कल्याणतराय केचित्त्रै
वकं यजामहे इति मंत्रेण पूजयंति स च मंत्रो नीलकंठसूक्ते व्याख्यातव्यः इति शत्रुघ्नविरचितं मंत्रार्थ
दीपिकायां आह्निकपरिच्छेदः अथ श्राद्धमंत्रव्याख्या विश्वेदेवास इति हे विश्वेदेवाः यूयं मे मम
इमं हवं आह्वानं शृणुत श्रुत्वा च आगत आगच्छत आगत्य च इदं बर्हिः कुशाः अत्र निषीदत उ
पविष्टा भवत आसनार्थोपकल्पितेषु कुशेषु उपविष्टा भवतेत्यर्थः अत्र विश्वेदेवास इति आज्जसे
रसुगिति असुगागमः शृणुत इति तस्य स्थमिपां तातं तातमइति आदेशः विश्वेदेवाः शृणुतेम

मं॰ यं॰ दी॰ २२

इमम॰ हवं मे इत्यादि हे विश्वे देवाः ते यूयं मे मम इमं हवं आह्वानं शृणुत ते के ये यूयं अंतरिक्षे।
स्थ तिष्ठथ येच उपसमीपे पृथिव्यां दिवि स्वर्गे च स्थ ये च अग्निजिह्वा हविर्भोजनसाधनं येषां
ते उत वा ये च यजत्राः यजंते आद्धकारिणं त्रायंते इति यजत्राः पुरूरवो माद्रव सुप्रभूत
यः किं हवं अस्मिन् बर्हिषि आसाद्य आसन्ना भूत्वा मादयध्वं हृष्टा भवत स्वार्थे णिच्। उ
शंतस्त्वेत्यादि हे अग्ने त्वा त्वां नि धीमहि तवाधानं कुर्म इति यावत् वयमित्यध्याहार्यं एव
यं किंभूताः उशंतः इच्छंतः अर्थी त्वे यद्वा पित्राह्वानं किंच उशंतः एव वयं त्वां समिधीम
हि ज्वालयामः तेन त्वं पितॄन् आवह आहूय त्वं किंभूतः उशन् इच्छन् हविरिति शेषः
पितॄन् किंभूतान् उशतः इच्छतः आज्ञीयं हविरिति शेषः आह्वानं किमर्थमित्यत आ
ह हविषे अस्मद्दत्त हविर्निमित्तं तदपि किमर्थं अत्तवे अदनाय यद्वा हविषः अत्तवे। २२

46

वाहयेति वाक्यार्थः उशन्त इति तु

अदनाय तथा च हे अग्ने एवमाराधितस्त्वं अस्मत्पितॄन् आवाहयेति वाक्यार्थः उशन्तस्त्वेति तु
मर्थे तवे ऊं प्रत्ययः आयंतु नः पितर इत्यादि नः अस्माकं पितरः आयंतु आगच्छंतु किंभूताः सो
म्यासः सोमपाः सोमसंपादिनः पुनः किंभूताः अग्निष्वात्ताः अग्निना सुष्ठु यथा स्यात् एवं आ
त्ताः भक्षिताः औ तस्मात् अग्निदग्धा इत्यर्थः अग्निदग्धा एवा च्यंते तादृशा एव हि श्राद्धयोग्या भ
वंतीति अभिप्रायः केन आगच्छंतु पथिभिः मार्गैः किंभूतैः देवयानैः देवानां यानं संचारो यै
रित्यर्थः आगत्य चास्मिन् यज्ञे श्राद्धयज्ञे अस्मान् अधिब्रुवंतु अधिकं ब्रुवंतु श्लाघंतामित्यर्थः
पितरः किंभूताः स्वधया श्राद्धीयान्नेन मदंतः तृप्यंतः किंच न केवलं अधिब्रुवंतु अधिकं
ब्रुवंतु किंतु अस्मान् अवंतु रक्षंतु च सोमपा अग्निष्वात्तादयः पितरः आगत्य मां श्लाघंतां रक्षं
तु चेति वाक्यार्थः शन्नो देवीरिति अभिप्रायः नो अस्माकं पितॄणामिति शेषः शं भवंतु कल्याण्यो

भवंतु किंभूता देवीः देव्यः स्तुतिक्रीडादियोग्याः किमर्थं अभिष्टये उपचयार्थं पीतये
पानायच किंच नः पितॄणां शंयोः कल्याणयोग्याय अभिस्रवंतु अभिमुखं स्रवंतु शं
योरिति शं शब्दात् मत्वर्थीयो युस्प्रत्ययः चतुर्थ्यर्थे षष्ठी ॥ यवोसि यवय इत्यादि ॥ हे यव
यवोसि पृथक्करणोसि अतोस्मद्द्वेषः द्विषः अस्मदारातीश्च यवय परस्परभिन्ना
न् संहतिरहितान् कुरु तथाच यतस्त्वं पृथक्कारी तस्मादस्मच्छत्रून् अपि पृथक् कुरु इत्य
र्थः द्विषः कृत्रिमशत्रवः अरातयः सहजशत्रवः यवइति युमिश्रणे इत्यस्मात् यचाद्य
च् अस्येव यवइतिरूपं अरातिशब्दः स्त्रीलिंगोपि वेदे ॥ तिलोसीत्यादि तिलोसि प॥
वित्रत्वेन प्र॰ सिद्धो इत्यर्थः सोमो देवता अस्येति सोमदेवत्यः गोसवः गोः स्वर्गसूते॥
इतिगोसवः देवेन विष्णुना स्वयं निर्मितः अद्भिः पृक्तः जलमिश्रितः यतस्त्वं राव २३

हि देवनिर्मितः ४

भूतः सर्वोत्कृष्टः अतो नोऽस्माकं पितॄन् लोकान् पितृपितामहप्रपितामहादीन् प्रत्नं चिरकालं स्वधया स्वधाकारे-
ण आप्यायितेन वा प्रीणाहि प्रीतान् कुरु स्वाहा सुहुतो भव ॥ या दिव्या इति ॥ ता आपो नोऽस्माकं शिवाः क्षेमाः भवंतु
याः पयसा संबभूवुः पयसा क्षीरेण संगता बभूवुः माधुर्यादिशीतलत्वादिना एकीभूता इत्यर्थः याः दिव्याः
दिवि स्वर्गे भवाः याः अंतरिक्षाः अंतरिक्षे भवाः उत अपि च याः पार्थिवीः पृथिव्यां भूताः आपः किंभूताः
आपः किंभूताः हिरण्यवर्णाः हिरण्यं रजतं तत्समानवर्णाः हिरण्यं रजतमित्युव्वटः पुनः किंभूताः
यज्ञियाः यज्ञार्हाः न केवलं क्षेमाः अपि तु शं कल्याण्यो भवंतु स्योनाः सुखदाः अ सुहवा सुष्टु ब्राह्मण-
हस्ते हुता भवंतु स्योनं सुखनामेति निरुक्तौ ॥ पितृभ्यः स्थानमसि ॥ हे पात्र पितृभ्यः पितॄणां स्थानमसि भ-
वसि यतस्त्वं पितॄणां स्थानमसि भवसि अतः पितॄणामवस्थानायानुज्ञीकृतमित्यभिप्रायः आवृता
स्तत्रेति वृंति पितरः श्राद्धदेवता इति प्रमाणमंत्र ॥ अग्नये कव्यवाहनाय स्वाहा सोमाय पितृमते स्वाहा अ-
ग्नये स्वाहा किंभूताय कव्यवाहनाय कव्यं पितॄणामन्नं तत् पितृभ्यो वहति प्रापयतीति तस्मै कव्यवाहनाय ।

मं-र्घ- सोमायस्वाहा किंभूताय पितृमते पितरस्तत्र संति इति पितृमान् तस्मै मधुवातेति तर्पणप्रकरणे व्याख्या
दी- तं॥ पृथिवीते इत्यादि हे अग्नौ करणशेषते तव पात्रमाधारः पृथिवी विश्वाधारभूता भूता द्यौः आकाशं अ
२४ पिधानमावरणं त्वां च ब्राह्मणस्य मुखे जुहोमि त्वां किंभूतं अमृतं हुताऽवशिष्टं मुखे किंभूते अमृते।
स्म= अनष्टे अभक्ष्यभक्षणादिभिरदूषिते अन्यदपि हविः अदृश्यदर्शनादिनोपहतं भवति तेनात्रापि
धानं क्रियते इत्यर्थः पृथिवीते पात्रमित्यनेन भोजनपात्रमेवाभिधीयते ब्राह्मणस्य मुखस्या।
ग्निसदृशत्वात् जुहोमीत्युक्तौ॥ इदं विष्णुरित्यादि। विष्णुर्भगवान् इदमन्नं विचक्रमे आक्रांतवान् य
तः स विष्णुः त्रेधा त्रिप्रकारेण पदं चरणं निदधे निहितवान् पृथिव्यामाकाशे स्वर्गे च तेन च स
मूढमस्य पांसुरे अस्य विष्णोः पदं पांसुरे धूलिमये प्रदेशे अर्थात् पृथिव्यां समूढं स
म्यक् निविष्टं तथा च विष्णुः पृथिव्यां पदं निहितवान् अतस्तदुत्पन्नतेनान्नमप्याक्रांतवान्
अतो राक्षसादयस्तस्मादपसरं त्विति वाक्यार्थः॥ अपहता असुरा इत्यादि असुराः अपह ८० २४

ता अपसारिताः संतितिशिषः किंभूताः वेदिषदः वेदिः आच्छादितपरिस्कृताभूमिः तत्र सीदंति देः
इति वेदिषदः नकेवलं असुराः किंतु रक्षांसि राक्षसाश्च अपसारिताः संतु तथा च तिलप्रदे
पणादसुरादयः आद्धस्थानात् अपसरंतीति वाक्यार्थः॥ अनग्निदग्धाइत्यादिनिगदव्या
ख्यानमेव गायत्रीव्याख्याता मधुवाता मंत्रव्याख्याने तर्पणप्रकरणे कृतंजप्य मंत्रा अग्रे
व्याख्यातव्या॥ ये रूपाणीत्यादि॥ उल्मुकं पुरस्तात्करोति ये असुराः पितृरूपाणि आत्मनि प्र
ति मुंचमाना वधूंतः संतः प्रतिपूर्वो मुंचति र्बंधनार्थः स्वधया पित्र्येणान्नेन हेतुभूतेन अस्मा
भिरेतत्वादितव्यमितिचरंति किंच पराःपुरः पराःक्रांताःपुरः शरीराणि महांतिनिपुरः निकृ
ष्टाः पुरः सूक्ष्माणि शरीराणि ये भरंति बिभ्रति धारयंति अग्निस्तान् असुरान् अस्माल्लोकात्
स्थानात्प्रणादातु प्रेरयतु प्रपूर्वोणदिः प्रेरणार्थः॥ अत्र पितरोमादयध्वं यथाभागमावृषाय
ध्वं हे पितरः अत्र मादयध्वं अत्र पिंडे मदयुक्ता हर्षयुक्ता भवंतु किंच यथाभागं स्वं स्वं भागं

म॰ पं॰ दी॰ २५

प्राप्य अत्र वृषायध्वं वृषाइव वलिनो भवत स्वेच्छया पिंडोपभोगार्थं पितॄणामभ्यर्थना वाक्यार्थः
॥ अमीमदंत पितरो यथाभागमावृषायिषत ॥ हे पितरः अमीमदंत मद्दत्तेन पिंडेनेति शेषः तथा
च मद्दत्तेन पिंडेन हर्षयुक्ता भूता इत्यर्थः किंच अत्र वृषायिषत मद्दत्त पिंडेन स्वे स्वे भागे प्राप्य वृषा
वृषाइव इति शेषः तथा च मद्दत्तेन पिंडेन वलिनो जाताः पूर्वमंत्रे अभ्यर्थना अस्मिन् मंत्रे।
सिद्धार्थ कथनमिति भेदः नमो वः इति मंत्र व्याख्यानं तर्पण प्रकरणे कृतं ॥ एतद्वः पितरो वा।
सः ॥ हे पितरः वो युष्मभ्यं एतद्वासः आच्छादनं दीयते इति शेषः ऊर्जं वहंतीरिति मंत्र व्याख्या
तर्पणे कृतेव ॥ वाजेवाजे इत्यादि ॥ वाजिनः वाजमन्नमस्यास्तीति वाजी तथा च श्राद्ध दत्तमन्न
पितॄणामस्तीति पितर एव वाजिन उच्यंते हे वाजिनः पितरः यूयं अवतरक्षत कुत्र नोऽस्मा।
कं वाजे वाजे अन्ने अन्ने तथा च यत् कृतमकृतं चान्नं श्राद्धार्थे उपकल्पितं तत्र सर्वत्र न केव
लं तत्र किंतु धनेषु द्रव्येष्वपि यूयं किंभूताः विप्राः विप्रमूर्त्तयः पुनः किंभूताः अमृताः। २५

स्माद्विराजः ब्रह्मणः पुरुषोमनुरध्यजायत समनुर्जातः सन् पुरोग्रे पश्चादपि भूमिंअ
त्यरिच्यत भूमावतिरिक्तोऽभवत् भूमिपदं देशोपलक्षणार्थं पुरः पश्चादिति कालोपस्या
पकं तेन क्वचिदपि देशे काले वा तस्य मनोः पुत्रपौत्रादिसंबंधिनः समृद्धिभिः सदृशो ना।
भूदित्यभिप्रायः॥ तस्माद्यज्ञात्सर्वहुत इत्यादि॥ तस्मात्पूर्वोक्तात्सर्वव्यापकात् पुरुषस्य
चतुर्थपादात्सर्वहुतः सर्वैर्हूयमानात् यज्ञस्वरूपात् पृषदाज्यं हविः संभृतं समुत्पन्नं
तत्पृषदाज्यं तान्पशून् चक्रे चकार तान् कान् ये आरण्या ग्राम्याश्च आरण्या मृगादयः
ग्राम्याश्छागादयः तान् किंभूतान् वायव्यान्वायुदेवत्यान्॥ तस्माद्यज्ञात्सर्वहुत इत्यादि॥ त
स्मात्सर्वहुतः सर्वैर्हूयमानात् यज्ञात् यज्ञपुरुषात् ऋचो ऋग्वेदः सामानि सामवेदः जज्ञि
रे जाताः तस्मादेव छंदांसि गायत्रीप्रभृतीनि जज्ञिरे जातानि तस्मादेव यजुः यजुर्वेदः अ।
जायतेत्यर्थः॥ तस्मादश्वा इत्यादि॥ तस्माद्यज्ञात्सर्वयज्ञस्वरूपात् अश्वा अजायंत न केवल

मं॰ पु॰ टी॰ ३४ मश्वाः किंतु येकेचोभयादतः ये केच उभयादंताः पशवः अश्वादयः तेप्यजायंत जाताः तस्मादे
वगावः जज्ञिरे जाताः तस्मादेव अजाः अवयश्च जाताः अजाश्छागाः अवयो मेषाः उभया
दत इति अन्येभ्योपि दृश्यते इति दीर्घः गावोह इत्यत्र हकारः समुच्चये अत्र कांडिकात्रये यत्किं
चिद्धविरात्मकं विध्यर्थवादमंत्राश्रया वेदाश्च पुरुषोत्तमात् पुरुषमेधयज्ञस्वरूपादेव सर्वं
जातमिति वाक्यार्थः ॥ तं यज्ञं वर्हिषीत्यादि ॥ तं पुरुषं यज्ञं यज्ञसाधनभूतं वर्हिषि संस्थाप्य देवाः
ब्रह्मप्रभृतयः साध्याः साध्यनामिनो गणदेवताः ऋषयो मरीचिप्रभृतयः प्रौक्षन् प्रोक्षित
वंतः तं किंभूतं अग्रतः प्रथमतो जातं तस्मात्तदानीमन्यहविरभावे स्वयमेव हविरासीदि
त्यर्थः न केवलं प्रौक्षन् किंतु तेन पुरुषेण यज्ञेन यज्ञसाधनभूतेन अयजंत यागं कृतवंतः।
अत्र कारणे कार्योपचारात् यज्ञेन यज्ञसाधनमभिधीयते प्रोक्षणग्रहणं सकलसंस्कारोप
लक्षणार्थं तथाच सकलसंस्कारैः संस्कृत्यानेन पुरुषपृषदाज्यादिरूपेण देवादयो या ३४

गं कृतवंत। इति वाक्यार्थः॥१०॥ यत्पुरुषं व्यदधुरिति॥ अत्र पूर्वोपात्ता एव कर्मकर्त्तारो नुवंजनी ८८
याः ते देवादयः यत्पुरुषं व्यदधुः। विहितवंतः ते कतिधा कतिप्रकारं व्यकल्पयन् वि
कल्पितवंतः विकल्पप्रकारमाह मुखं किमस्यासीदित्यादि अस्य पुरुषस्य मुखं किमा
सीत् किं बभूव किं बाहू किमूरू किं पादाः पादौ च किं उच्येते इति॥ ब्राह्मणोस्य मुखमित्यादि॥
पूर्वकंडिकायां सृत्यर्थं विकल्पः कृतः आकांक्षोत्थापनाय अत्रस्तुतिमाह अस्य पुरु ५-५
षस्य मुखं ब्राह्मण आसीत् बभूव अस्य बाहू राजन्यः क्षत्रियः कृतः अर्थादीश्वरेण अस्य
ऊरू तत् यद्वैश्यः कृतः एवं ब्राह्मणादयः मुखादिभ्यो जाता इति बोध्यं अग्रे तथा दर्शनात् अस्य प।
द्भ्यां शूद्रः अजायत अयमेव ब्राह्मणादि चतुष्ट्ररूप इति वाक्यार्थः॥११॥ चंद्रमा मनस इति॥ अस्य
पुरुषस्य मनस इति मनसः सकाशात् चंद्रमा जातः चक्षोः चक्षुषः सूर्योऽजायत जातः श्रो
त्राद्वायुः प्राणश्च अजायत मुखादग्निरजायत अन्यत्र चन्द्रसूर्यवायुभ्यो मनश्चक्षुः श्रोत्रा।

मं.र्थ. दी. ३५

णामुत्पत्तिरिति सृष्टिक्रमः अनन्ताचिंत्यमहिम्नि पुरुषे मन आदुः श्रोत्रेभ्यश्चंद्रमः प्रभृतीनामु
त्पत्तिक्रम इति वैरीत्यकथने स्तुतिरिति पुरुषस्तुतिरेव वाक्यार्थः १२ नाभ्या आसीदंतरिक्षमित्या
दि॥ नाभ्यानाभितोंऽतरिक्षमाकाशं बभूव शीर्ष्णो मस्तकात् द्यौः स्वर्गः समवर्त्तत समभवत् पद्भ्याप
दद्वयात् भूमिः समवर्तत श्रोत्रात्कर्णाद्दिशस्समवर्त्तत तथा स एव पुरुषः लोकान्देवमनुष्यादि।
निखिलस्थावरजंगमादि त्रैलोक्यं अकल्पयन् अकल्पयत् सृष्टवान् १३ यत्पुरुषेणेत्यादि॥ पुरु
षेण हविषा हविर्भूतेन देवा यज्ञमतन्वत कृतवंतः देवा इत्युपलक्षणं साध्या ऋषयश्च अस्य वसं
तः ऋतुविशेषः आज्यं घृतमासीत् बभूव ग्रीष्म इध्मः समिद्विशेष आसीत् शरद्धविरासीत् यो
ग्यतावशात् आज्यातिरिक्तं हविः पुरोडाशादि १४ सप्तास्यासन् इत्यादि॥ अस्य यज्ञस्य परिध
यः भूमिवेष्टनानि सप्त अब्धयस्समुद्रा आसन् बभूवुः त्रिः सप्त एकविंशतिः समिधः कृताः
सप्तछंदांसि सप्त उपछंदांसि सप्त व्याहृतयश्च एतानि समिधः कृता इत्यर्थः अस्य कस्यय
त् यं यज्ञं तन्वानाः कुर्वाणाः देवाः पशुं पशुभूतं पुरुषमबध्नन् बद्धवंतः अत्र सप्तेति संख्या

56

तत्र संख्येये ४।

मात्रं श्रूयते ननु संख्येये कल्प्यमाने यज्ञभूमिवेष्टकं कल्पनीयं यज्ञभूमिश्च भारतवर्षं तद्वेष्टका
श्च लवणार्णवप्रभृतयः सप्तसमुद्रा एव संभवंति त्रिः सप्त इत्यत्रापि संख्येयकल्पनायां छंदां
सि जज्ञिरे तस्मादित्यत्र यज्ञसाधनसृष्टौ एकविंशतिछंदसां उक्तत्वात्तेषामेव ग्रहणं १५ यज्ञे
न यज्ञमयजंत इत्यादि देवा इन्द्रादयः यज्ञे यज्ञसाधनभूतेन पुरुषेण पश्वादिभूतेन यज्ञं य
ज्ञपुरुषं पुरुषोत्तमं अयजंत पूजितवंतः कुत्र दृष्टं पुरुषं पशुं कृत्वा यज्ञात्मकेन कर्मणा य हिंसा=
ज्ञः क्रियते इत्यत्र आह तानि धर्माणि प्रथमान्यासन् तथा च ते धर्माः प्रथमा एवासन् अन्य
त्र तद्दर्शनमसंभावितमेवेत्यर्थः अत एव ते देवाः एवंरूपेणैव यज्ञेन द्युनाकं स्वर्गं सचंत संगताः
अत्र नाके पूर्वे साध्यादयो देवाः महिमानः महात्मानः संति ते ह नाकमित्यत्र हकारः छांद
सः स्तोभः सचंतेति षच समवाये इत्यस्माल्लङि प्रथमपुरुषबहुवचनं छंदस्यऽमाङ्
योगेपीत्यडागमनिषेधः १६ अथोत्तरनारायणम् अथ पुरुषमेवादित्यरूपेणस्तौ

मं॰ब्र॰ टी॰ २६

तिं अद्भ्यः संभृत इत्यादि तत्राऽऽदित्यः अद्भ्यो जलात् पृथिव्यै पृथिव्या अपि अग्रे प्रथमं संभृ
तः बभूव अत्र पृथिवीपदं पंचभूतोपलक्षणार्थं तेन पंचभूतोत्पत्तिपूर्वकाले एव संभृत इत्य
र्थः न केवलं पंचभूतेभ्य एव पूर्वं संभृतः किंतु विश्वकर्मणो ब्रह्मणो रसात् इच्छातोपि प्रथमं
समवर्तत यदा विश्वकर्मणो जगन्निर्माणेच्छा नाभूत तदैव समवर्त्ततेत्यर्थः तस्मात्तस्या
दित्यस्यैव तद्रूपं मंडलाकारं मर्त्यस्य मनुष्याणां सृष्टितोपि अग्रे पूर्वं देवत्वं विदधत् धारय
१ त् ॅति एभिर्मनुष्यैः समेति समागच्छति इति आजानं अतिशयेन ज्ञानवान् अहं आजानं
अनौपाधिकमिति देवत्वस्य वा विशेषणं वेदाहमेतमित्यादि अहमेतं पुरुषं वेद जानामि
अस्मदादीनां सर्वेषां अयमनुभवसिद्ध इत्यर्थः एतं किंभूतं महांतं सर्वव्यापकं पुनः किंभूतं
आदित्यवर्णं आदित्यरूपं ज्योतिर्मयमित्यर्थः यथाऽऽदित्यः स्वप्रकाशः परानपि प्रकाशय
ति तमसः परस्तात् तमसः अविद्यात्मकसंसारात् पारमुत्तीर्णमित्यर्थः तमेव पुरुषमेव

58

आदित्यरूपं ज्ञात्वा मृत्युमतिक्रम्य एति गच्छति अपुनरावृत्तये नान्य इति अयनाय मृत्युम
तिक्रम्य गमनाय अर्थात् मोक्षाय अन्यः पंथा न विद्यते तथा चायमेव पुरुषो ध्यानगम्यो 59
ज्ञातो मोक्षं ददातीति वाक्यार्थः "प्रजापतिश्चरति गर्भे" इत्यादि प्रजापतिः प्रजानां पतिः पुरुष
एव सूर्यरूपः अंतश्चरति अर्थात् प्राणिनां देहमध्ये जीवात्मकतया वसतीत्यर्थः किं
भूतः गर्भे अजायमानोपि नित्यत्वादनुत्पत्तिधर्मापि बहुधा बहुप्रकारेण जायते स्थावर
जंगमात्मकदेहेषु जन्म लभते यद्वा अजायमानोपि गर्भे बहुधा प्रकारेण जायते रामादि
शरीरेणेत्यर्थः तस्य प्रजापतेः योनिमुत्पत्तिस्थानं धीरा ब्रह्मवादिनः परिपश्यंति ध्यानेन
सम्यगुपलक्षयंतीत्यर्थः तत्स्थानं ब्रह्मैवेति तात्पर्यम् तस्मिन्प्रजापतौ विश्वा विश्वानि
सर्वाणि भुवनानि स्वर्गमर्त्यपातालानि तस्थुः स्थितानि हकारः स्तोभार्थः विश्वा इति

मं॰ध्य॰ छांदसो निपातः ॥ यो देवेभ्य इति ॥ यः सूर्यः आतपति आसमंताद्भावेन तपति किमर्थं देवेभ्यः ।
दी॰ देवानां प्रयोजनाय उदिते ह्यादित्ये देवकर्मण्यधिकारो भवति यो देवानां पुरोहितः यश्च देवा
३८ नां पुरः पूर्वं हितः आहितः स्थापितः देवानां हविर्दानात्पूर्वमग्निरूपेणाधीयत इत्यभिप्रायः । ६०
यो देवेभ्यः सकाशात्पूर्वो जातः उत्पन्नः आदित्यो द्वादशादित्याः प्रथममुत्पन्ना इत्यर्थः तस्मै
य×५ आदित्याय नमः आदित्यं किंभूताय रुचाय रोचमानाय ब्राह्मये ब्रह्मसुताय ब्रह्मणोऽपत्यं
ब्राह्मिः ॥ रुचं ब्राह्मं जनयंत इत्यादि ॥ देवा ब्रह्मादयः जनयंतः स्वयमुत्पद्यमानाः ते ब्राह्मं ब्र
ह्मसुतं रुचं रोचमानं प्रकाशरूपमादित्यं अग्रे प्रथमम् अब्रुवन् अयमेवास्माकं मुख्य इत्युक्त
वंतः किंच हे पुरुषोत्तम त्वां त्वामेवमनेनाध्यायेनोक्तरूपं ब्राह्मणो विद्यात् जानीते तस्य ।
ब्राह्मणस्य देवा वशे इच्छायां संभवंति इच्छानुवर्तिनो भवंतीत्यर्थः तथा च सहस्रशीर्षेत्या
दिग्रंथतोऽर्थतश्चाधीत्य यो ब्राह्मणः पुरुषोत्तमं जानाति तस्य ब्राह्मणस्य देवा ब्रह्मादयो ३८

भिलषितानि संपादयंतीति वाक्यार्थः ॥ म॰ श्रीश्च ते लक्ष्मीः इत्यादि ॥ हे पुरुषोत्तम तव श्रीर्लक्ष्मीश्च प॰ त्न्यौ सहचारिण्यौ
ता मा लं वे ते इत्यर्थः चकारद्वयं तुल्य प्रधानज्ञापनार्थं श्रायय तीति श्रीर्धनैर्दानं यद्दशा पुरुषो लोकानामा॰
श्रयणीयो भवति लक्ष्मीर्धनं यद्दशा पुरुषः सर्वलोकस्य लक्ष्यो दर्शनीयो भवति लक्ष दर्शनांकनयोरित्यस्य रू॰
म॰ पं श्रीरिति श्रिञ् सेवायां इत्येतस्य रूपं अहोरात्रे पार्श्वे अहश्च रात्रिश्च तव पार्श्वे द्वयं अत्राहः शब्दः परब्र
ह्मपरः तस्य विद्यात्मकत्वेन प्रकाशकरूपत्वात् रात्रिशब्दः संसारपरः तस्याऽविद्यात्मकत्वेना प्रकाशकत्वा
त् एतेन धर्मार्थकामात्मकः संसारः मोक्षश्च श्रीपुरुषोत्तम पार्श्वे द्वयं इत्युक्तं भवति नक्षत्राणि रूपं ताराग
णो मूर्तिरित्यर्थः अश्विनौ द्यावापृथिव्यौ तव व्यात्तं विवृतं मुखमित्यर्थः तथा च श्रुतिः इमे हि ते सर्वं व्यश्नु॰
तामिति एवंभूतं त्वां पुरुषोत्तमं याचे इष्णन् इष्णन् इष्णं तं सकामं इषाण इच्छ अनुगच्छ अनुगृहाण नि॰
जोपासकं सर्वमनुगृहाणेत्यर्थः किंच मे मम मम अमुं लोकं भार्या पुत्र धनादिकं इषाण न केवलं अमुं किंतु
मे मम सर्वलोकं भूरादि सर्वलोकं इषाण अयं वाक्यार्थः यः कश्चित् स्वर्गपुत्रादिकामयमानो अनेन स॰

पृ॰४

मं॰ पं॰ हस्त्रशीर्षाध्यानेनतांस्तौतिपूजयतिउपतिष्ठतेतमनुगृहाण ममापिपुत्रपश्वादिधनयुक्तमिहलोकेस्वर्गमो
दी॰ क्षादिकंइच्छ तस्तवेच्छामात्रेणैवसर्वसंपद्यते सत्येकत्वादित्यभिप्रायः अत्रस्तुतिपूर्वप्रार्थनमर्हतीतिस्तुताप्रा
३८ र्थना अथाप्रतिरथं आशुः शिशान इत्यादि इंद्रंस्तौति इंद्रः शतं वह्नीः सेनाः साकंसहैवएकदेव अजयत्
जितवान् इन्द्रः किंभूतः आशुः शीघ्रः शिशानः शातनकर्त्ता शोतनूकरणे वृषभोनभीमः नकारउपमार्थी।
घनाश्चावहं तियं=५ यः वृषभइवभीमः बिभेत्यस्मादितिभीमः भयानकः घनाघनः घनोवहः यद्वा घनशरीरः पुनः किंभूतः चर्ष
णीनांमनुष्याणांक्षोभणः संचालकः संक्रंदनः संग्रामकारिणसमाह्वाता अनिमिषः अप्रमादी अर्यादाहवे।
यद्वा अनिमिषोदेवः एकवीरः एकएववीरोविक्रांतः संक्रंदनेनानिमिषेणेत्यादि तदिंद्रेण तादृक्गुणविशि
ष्टेनेंद्रेण तत्सैन्यंजितमितिशेषः हेनरः हेमनुष्याः हेयुधः हेयोद्धारः तत्सहध्वं तद्वजयताऽभिभवत युध
संप्रहार इत्यस्य क्विपि युध् इति कीदृशेनेन्द्रेणसंक्रंदनेनशब्दकारिणा अनिमिषेणएकाचितेन अप्रमाद्य
ता जिष्णुना जयशीलेन युत्कारेणसंप्रहारकारिणा दुश्च्यवनेन अप्रच्युतस्वभावेनधृष्णुना प्रसहनशी। ३८

घनाश्चावहंतियं=५

स्तेन पुनः किंभूतेन इषुहस्तेन वाणपाणिना वृंदमावर्षणशीलेन यद्वा इन्द्रेण तत् जितमिति योजना ॥ स इषुहस्तैरि
त्यादि ॥ स इन्द्रः इषुहस्तैर्योद्धृभिः संस्रष्टा संसृजति मिलति सङ्गाव इन्द्रो निषंगिभिः खड्गिभिः संसृजति स किंभूतः व
शीकांतः सर्वजनप्रियः स्वतंत्रो निगृहीता [illegible] गैर्वा ईश्वरो वा स इंद्रः युधः योधृन् स्वानगणेन शत्रुगणे
न संसृज्य संसृष्टजित् संसृष्टान् शत्रून् जयतीति संसृष्टजित् पुनः किंभूतः सोमपाः पुनः किंभूतः बाहुश
र्ध्यूर्ध्वी बाहुवल निर[illegible]ः शर्ध इति वलनाम उग्रधन्वा उद्यतधन्वा पुनः किंभूतः प्रतिहताभिरस्ता शत्रुशरीरे
षु प्रतिहिताभिः इषुभिः अस्तान् प्राशत्रूणामेव एतेन लघुसाधनत्वमुक्तं वृहस्पते परि दीयेत्यादि इन्द्रपुरोहितत्वे
न वृहस्पतिः स्तूयते हे वृहस्पते रथेन परदीय परिगच्छ त्वं किंभूतः रक्षोहा किं कुर्वन् अमित्रान् शत्रून् अप
वाधमानः परिपीडयन् किंच सेनाः शत्रुसेनाः प्रभंजन् प्रमर्द्दयन् प्रमर्द्दकान् युधा जयन् सन् अस्माकं
रथानां अविता गोप्ता एधि भव ॥ वलविज्ञायेत्यादि ॥ हे इंद्र स त्वं जैत्रं जेतारं रथं अधितिष्ठ त्वं किंभूतः गोवित् स्तु
तिवित् पुनः किंभूतः वलविज्ञायः वले विज्ञायते प्रसिद्धः वलाविज्ञाय स्थविरः विसर्गलोपः छांदसः

मं॰ धी॰ टी॰ ३९

सर्वानुशासकः सर्वमान्योवा चिरंतनोवा प्रवीरः प्रकृष्टोवीरः सहस्वान् वलवान् वाजी वाजवान् वाजमन्नं सहमानः
उग्रश्च भीषणः अभिवीरः वीरंवीरंअभिलक्ष्य गच्छतीति अभिवीरः अभिसत्वासत्वं सत्वमभितिष्ठति इति अभिस
त्वा सहोजाः सहइति वलनाम वलाज्जातः नह्यन्यस्माज्जातः एतादृशोभवति॥ गोत्रभिदंगोविदं इत्यादि हे सजाताः
समानजन्मानोदेवाः इममिंद्रं अनुवीरयध्वं वीरकर्मकुर्वाणंवीरकर्मणोवानुगम्य प्रोत्साहयत हे सखायः सखिभू
ताः एनंअनुसंरभध्वं अनुगम्य संरंभंकुरुत एनं किंभूतं गोत्रभिदं असुरगोत्रभिदं यद्वा गोत्रभिदं वृष्ट्यर्थं मे
घंभिनत्ति गोविदंअपांलब्धारं यद्वावाग्विदं पंडितं वज्रवाहुं वज्रपाणिं जयंतमज्म अज्मसंग्रामेजयंतं ओजसावले
नप्रमृणंतमर्दयंतं अर्थात् यस्यैव अज्मसंग्रामः॥ अभिगोत्राणीत्यादि॥ इन्द्रोऽस्माकंसेनाः प्रयुत्सु प्रकृष्टयुद्धेषु अ
वतुरक्षतु इंद्रः किंभूतः गोत्राणि असुरकुलानि मेघवृंदानिवा सहसा प्रकृष्टवलेनाभिगाहमानः आक्रामन् अ
दयोनिस्त्रासः वीरः विक्रांतः शतमन्युर्वहुक्रोधः शतयज्ञोवा दुश्च्यवनः अचाल्यः पृतनाषाट् पृतनांसेनांसहते
अभिभवति पृतनाषाट् अयुध्यः युध्यमानः अप्रतियोधः॥ इंद्र आसांनेनेत्यादि आसांदेवसेनानां व्यूहरचना
नांइंद्रोनेताभवतु नियामकोभवतु वृहस्पतिश्च नेताभवतु नियामकोभवतु मंत्रप्रणीतानि कार्याणि तानि कार्या॥ ३९

65

राजाकरोतीत्यभिप्रायः दक्षिणा दक्षिणस्यां दिशि यज्ञ एतु सोमः पुरः पुरस्तात् एतु आगच्छतु यद्वा दक्षिणायज्ञश्च सो
मश्च पुर एतु सेनानां किंभूतानां अभिभंजतीनां मर्दयंतीनां शत्रूनिति शेषः जयंतीनां तानेव किंच मरुतः गणभूताः
अग्रे निरुध्येति शेषः यंतु गच्छंतु॥ इंद्रस्य वृष्णो वरुणस्येति॥ वृष्णो वर्षितुः इंद्रस्य राज्ञः वरुणस्य आदित्यानां मरुतां च
शर्द्धः बलं हस्त्यश्वरथपदातिलक्षणं उदस्थात् उद्बभूव शर्द्धः किंभूतं उग्रं उद्धूर्णायुधं अयानेतरमेव देवानां।
घोषः उदस्थात् देवानां किंभूतानां जयतां जयशीलानां महामनसां उत्कृष्टचित्तानां भुवनच्यवानां भुवनच्यवन।
समर्थानां जितं जितमिति शब्दस्तेषां समुद्भूत इत्यर्थः॥ उद्धर्षय मघवन्नित्यादि॥ हे मघवन् आयुधानि उद्धर्षय उ
द्गतहर्षाणि कुरु उत्त्रासयेति यावत् किंच सत्वानां मनुष्याणां मामकानां च मनांसि उद्धर्षय किंच हे वृत्रहन् वाजिनां
अश्वानां वाजिनानि बलानि उद्धर्षय किंच जयतां रथानां घोषाः उद्यंतु उद्गच्छंतु॥ अस्माकमिंद्र इत्यादि॥ अ
स्माकं ध्वजेषु इंद्रः रक्षिता भवतीति शेषः ध्वजेषु किंभूतेषु समृतेषु संगतेषु शत्रुचापध्वजसंगतेष्वित्यर्थः
किंच इंद्रप्रसादात् देवा अस्माकं या इषवः ता जयंतु अस्माकं वीरा उत्तरे विजयिनो भवंतु किंच अस्मान् उ देवा अव।
ताहवेषु उ एवकारार्थे हे देवाः अस्मानेवाऽऽहवेषु आह्वानेषु संग्रामेषु वा अवत रक्षत॥ अमीषां चित्तमित्यादि॥

८४ २८

हे अप्वे माये अमीषां शत्रुवलसंबंधिनां मनुष्याणां चित्तं चित्तानि प्रतिलोभयंती मोहयंती लुभ मोहने शत्रूणां अंगानि गृ।
मं॰ धी॰ ण ततः परेहि परतरानपि शत्रून् गृहीतुं गच्छ ततश्च अभि प्रेहि वशत्रून भितः प्रकर्षेण इहि पुनः पुनरित्यर्थः तानेव।
दी॰ ४० ह शुशोकैर्निर्दहतेषां हृदयानि दह इत्यर्थः किंच त्वत्प्रसादोद्धेन तमसा अमित्राः शत्रवः सचंतां सेसेव्यंतां अंधेन
न×४ तमसा अज्ञानलक्षणेन ॥ अवसृष्टा परापतेत्यादि इषुं प्रत्याह हे इषो अवसृष्टा निर्द्दिप्ता सती परापत निपत गच्छ गच्छे
नृ×५ ति पुनरुपादानं त्वरार्थं गता च अमित्रान् प्रपद्यस्व प्रपन्ना भव ततः अमीषां शत्रूणां मध्ये कंचन मा उच्छिषः अवशेष
य शत्रून् उद्धृत मूलान् कुर्वित्यर्थः किंभूते शरव्ये शरमये ब्रह्मसंशिते ब्राह्मणाः तितरां शिते तीक्ष्णीकृते ॥ प्रेताजय
ता नर इंद्र इत्यादि ॥ योधृन् प्रत्याह हे नरः मनुष्याः प्रेत प्र इत प्रेत प्रकर्षेण गच्छत अनंतरं आजयत वो युष्माकमिंद्रः।
शर्मशरणं यच्छतु किंच भवतां वाहवः तथा उग्राः उद्गूर्णायुधाः संतु यथा यूयं अनाधृष्याः अप्रधृष्याः आस
थ भवथ ॥ असौ या सेना इत्यादि ॥ हे मरुतः असौ या सेना परेषां शत्रूणां अभ्येति अभ्यागच्छति अभिमुखमाग।
च्छति अस्मान् प्रतीत्यर्थः सेना किंभूता नः अस्मान् ओजसा बलेन स्पर्धमाना तां सेनां तथा गूहत व्याप्नुत के

नअपव्रतेन तमसा व्रतमिति कर्मनाम तथाच येन तमसा व्याप्तानां शत्रूणां सर्वाणि कर्माणि नश्यंति तेन व्याप्नुत तथा कथं
यथा अमी सेनकाः अन्यो अन्यं न जानन् परस्परं न जानीयुरित्यर्थः ॥ यत्र वाणा इत्यादि तत्तत्र इंद्रः नोऽस्माकं शर्म शर
णं यच्छतु ददातु किंच बृहस्पतिरदितिश्च विश्वाहा सर्वदा शर्म यच्छतु तत्र कुत्र यत्र वाणा इषवः संपतंति निर्मर्यादं प
तंति कइव विशिखा मुण्डित मुंडाः कुमाराइव यथा सर्वमुण्डाः कुमाराः क्रीडार्थं ततं देशं सन्निपतेयुरित्यर्थः ॥ म
र्माणि त इत्यादि कवचं प्रयच्छति ॥ तव मर्माणि वर्मणा कवचेन आच्छादयामि सोमो राजा त्वा त्वाममृतेन अ
नुवस्तां आच्छादयतु किंच वरुणः तेन वइदे वर्म उरोरपि वरीयः उत्कृष्टादपि उत्कृष्टं कृणोतु करोतु जयंतं जय
शालिनं त्वा त्वां देवा अनुमदंतु हर्षयंतु अथ विभ्राडित्यादि सूर्यसूक्तं विभ्राड्बृहदित्यादि सूर्यस्तुतिः सः सू
र्यः सोम्यं सोममयं मधु मधु इव पिबतु इत्यर्थः पिबतु सूर्यः किंभूतः विभ्राट् विशेषेण भ्राजते राजते इति वि
भ्राट् किं कुर्वन् यज्ञपतौ यजमाने अविह्रुतं अनवखंडितं आयुः दधत् स्थापयन् छंदसीति रुगादेशः
सकः यः सूर्यः त्मना आत्मनैव जगत् अभिरक्षति मंत्रेष्वाङ्यादेरात्मन इत्याकारलोपः यः किंभूतः ।

मं.ध्री. वातधूतः वातप्रेरितः वातोस्य वोढेत्यर्थः यस्य प्रजाः पुपोष वपोषंति शीमोक्ष वर्षैः यस्य पुरूधाव हुधानिराज
८१ तिदीप्यते अग्निविद्युन्नक्षत्रादिभिः मधु किंभूतं बृहत् महत् उदित्यमिति सूर्योपस्थाने व्याख्यातं॥ येनापाव।
केत्यादि॥ हे पावकेत्यादि हे पावकयेन चक्षसा दर्शनेन जनान् अनुलक्षीकृत्य तं सर्वमेध याजिनं यजमानं भु
रण्यं पक्षिवत् शीघ्रगच्छंतं पश्यसि हे वरुण सूर्य तेन च पश्यसि तेन ध्यानेनास्मानपि भुरण्यतः पश्येत्यर्थः
शकुनिवत् शीघ्रगामी भुरण्यमित्युच्यते इत्युवटः॥ दैव्यावध्वर्यू इत्यादि॥ हे दैव्यावध्वर्यू दिवसं वधिनौ अ।
ध्वरनेतारौ इह आगतं आगच्छतं केन सूर्यत्वचा सूर्यदीप्तिना रथेन सूर्यस्येव त्वक् दीप्तिर्यस्य स सूर्यत्वक्
आगत्य च मध्वा मधुस्वादेन हविषा सोमपुरोडाशद्रव्यादिना यज्ञं समंजाथे समक्तं अंजेरेतद्रूपं प्रभूतानि
हवींषि कुरुतमित्यर्थः॥ तं प्रत्नथा पूर्वथेत्यत्र देवानामिति कौ व्याख्यायते॥ तं प्रत्नथा इति॥ हे सोमया
गयासु दिक्षु येषु यजमानेषु अनुवर्धसे पुनः संस्क्रियते तासु तदीयासु क्रियासु अवस्थितः सन् प्रतीची
नं आत्मनोभिमुखं इंद्रमवस्थाप्य स्ववीर्येण स्थापयिता अस्मै यजमानाय वृजिनं बलं वद यज्ञफले।

दोहसे पूरयसि कथं पूरयसि प्रत्नथा उपमार्थीयः प्रत्नशब्दः पुराणवचनः तथा च चिरंतनानामिव ऋषीणामित्यर्थः
पूर्वथा पूर्वेषामिव ऋषीणां साध्यानां विश्वथा विश्वेषामिव ऋषीणां इमथा इदानींतनानामिव ऋषीणामित्यर्थः इं
द्रं किंभूतं ज्येष्ठं ज्ञातिं उत्कृष्टं विस्तारं अथवा ज्येष्ठं प्रशस्यं बर्हिषदं बर्हिषि तिष्ठंतं स्वर्विदं स्वर्लोकं जानंतं तद्वासित्वा
त् धुनिं कंपयितारं शत्रूणामिति शेषः धूञ् कंपने आभ्रजयंतं तु शीघ्रं जयंतं जेतव्यानि इति शेषः अयं वेनश्चो
दयदित्यादि अयं वेनः कांतः चंद्रमा इतियावत् पृश्निगर्भाः आपः चोदयतु प्रेरयतु पृश्निः द्युलोकः सूर्यो वात
स्य गर्भे तिष्ठतीति पृश्निगर्भाः वेन इति वेन कांतौ इत्यस्य प्रयोगः चंद्रमाः किंभूतः ज्योतिर्जरायुः ज्योतिषे जरा
युवत् गर्भपुटवद्यस्य कस्मिन्समये रजसः जलस्य विमाने त्यागसमये ग्रीष्मांत इत्यर्थः इममेव सोमं अपां सूर्य
स्यंदमानानां संगमे सतिगृहीताभिः वसतीवरा त्रिलक्षणाभिः शृतं मेधाविनो विप्राः मतिभिर्मति पूर्विकाभिर्वा
ग्भिः रिहंति स्तुवंति वसतीव आपः अपां संगमे सूर्यस्य शस्यंतेसा विस्यंदमानानां शस्यत इति श्रुतिः चित्रं दे
वानामिति व्याख्यातं सूर्योपस्थाने आन इडाभिर्विदथे इत्यादि सविता देवः अस्माकं विदथे यज्ञे तया तेन प्रका
रेण आएतु आगच्छतु इडाभिर्यज्ञकरणभूताभिः सुशस्तिसुशस्तिभिः शोभनशंसनैर्हेतुभूतैः सविता किं तां २

मं॰ध॰ भूतः विश्वानरः विश्ववर्त्तिनो जनान् अत एव रक्षकः विश्वानरः सूर्य इत्युवटः तथा कथं यथा येन प्रकारेण हे
टी॰ युवानः सर्वकर्मक्षमाः अपरिणामिनः देवा इति यावत् नः कृते विश्वं जगत् मत्सथ तृप्यत तर्प्पयथ अभिपि
४२ ते अभिपतनकाले अन्नाय वा कया मनीषा बुध्या ॥ म॰ यदद्य कच्चेत्यादि ॥ हे सूर्य वृत्रहन् वृत्रं और्वतमः तस्य हंतः
यत कच्च यत्र कुत्र चित्त्वं अभ्युदगाः अभ्युदेषि हे इंद्र परमेश्वर तत्सर्वं ते तव वशेवर्तते तत्र त्वमेवैक ईश्वरो
नान्य इत्यभिप्रायः ॥ म॰ तरणिर्विश्वदर्शत इत्यादि ॥ हे सूर्य त्वं तरणिः तूर्णं प्रवर्त्तसे विश्वदर्शतः विश्वस्य सर्वस्य द
र्शनीयः ज्योतिः कृत ज्योतिषो कर्त्ता त्वमसि अतस्त्वामिष्टं ब्रूमः त्वमेव विश्वं सर्वं जगत् आभासि दीपयसि वि
श्वं किंभूतं रोचने दीप्यमाने अग्निविद्युन्नक्षत्रादिरूपेण त्वमेव सर्वत्र भासीत्यर्थः ॥ म॰ तत्सूर्यस्य देवत्वमित्यादि ॥ सू
र्यस्य तद्देव देवत्वं तद्देव महित्वं महिमा यत् कर्त्तोः कर्मणः मध्या मध्ये विततं रश्मिजालं कल्यां तद्वा तकाले सं
जभार संजहार ते नान्य एवन्नशक्नोति तन्नितु नोपसंहर्त्तुं अत्यभिप्रायः किंच यदा पत् इत् इथं सधस्थात् रश्मी
नां सहस्थानात् अर्थात् पृथिव्यादिलोकत्रयात्तेहि तत्र निपतंति अतस्तस्मादाहृत्य हरितः हरिद्वर्णान् अश्वान्

यदा रश्मीन् आत्मनि अयुक्त युक्तवान् आत्मसंस्थानः करोत् आद्रात्रीति आत् अघासिम अस्मै सर्वस्मै जगते रात्रीवासः तमो
वासः तनुते विस्तारयति एवमेकत्र आदित्यसहितं ज्योतिरन्यत्र तमः आदित्यप्रभावाद्भवतीत्यभिप्रायः ॥ तन्मित्रस्येत्यादि ॥ सूर्यः
मित्रस्य वरुणस्य च अभि॰चक्षे अभिदर्शना यद्योः द्युलोकस्य उपस्थे उत्संगे तत् रूपं कृणुते मंडलाकृति रूपं करोतीत्यर्थः
मित्रो हि सुकृतिनोनुगृह्णाति वरुणो दुःकृतिनः सूर्योदये हि एवमनेन प्रकारेण तौ जगदनुगृह्णीत इत्यर्थः किंच अस्य सूर्य
स्य अन्यत् पाजः रूपं हरितः इन्द्रियवृत्तयः संभरंति सर्वहितं विदधति बिभ्रति रूपं किंभूतं अनंतं अपर्यंतं कालतो दे
शतश्च रुशत् शुक्लं जरामरणादिभिरयुक्तं विज्ञानघनानंदमयमित्यर्थः पुनः किंभूतं कृष्णं अन्यच्च द्विविधमित्यर्थः ॥ बण्
२ः महाँ असीत्यादि ॥ हे सूर्य बट् सत्यं महानसि महदसि ब्रलेत्यर्थः हे आदित्य बट् सत्यं महानसि तेजसेति शेषः किंच म
हः महतः ते महिमा भाग्यं सर्वदेवेष्वपि तः सर्वैः प्राणिभिः पनस्यते पूज्यते अतः हे देव दानक्रीडादिगुणयुक्त अद्धा तत्व
तः महानसि अभ्यासे भूयांसमर्थं मन्यंते यथा दर्शनीयो दर्शनीय इति तेन न पुनरुक्तिदोषः ॥ बट् सूर्य श्रवसा महाँ २
आग्रयणी येन=३ असीत्यादि ॥ हे सूर्य बट् सत्यं श्रवसा श्रावणीयेन बलेन महानसि हे देव सत्रा सत्यं महान् असि किंच महा स्वकीयेन सहते
न देवानां मध्ये असुर्यः असि असुरस्यासीति असुरः प्राणी तस्मै हितः असुर्यः उणादिभ्यो यत् प्राणिनां हित इत्यर्थः पुरोहि
तः पुरएनं दधति सर्वकर्मसु इति पुरोहितः प्रथमपूज्यः किंच विभु व्यापकं अदाभ्यं उपहिंस्यं ज्योतिर्विज्ञानानन्दं तमेवेत्य

आग्रयणी येन = ३ मं॰ ८

म॰ वे॰ दी॰ ४३

र्थः॥ मं॥ आयंतेऽइव सूर्यइति॥ यथा सूर्यं रश्मयः आयंते आश्रयंते किंच इन्द्रस्य इंद्रसंबंधीनि इत इमानि वसूनि इन्द्रा जाता।
नि सूर्यं अभक्षत भजंते एवं वयमपि सूर्यं समाश्रिताः तदुपष्टंभात् विश्वे विश्वानीन्द्रस्य धनानि जाते पुत्रपौत्रप्रपौत्रादौ ज
नमाने जनिष्यमाणे च भविष्यत्कालविषये ओजसा बलेन ज्ञानकर्मसमुच्चयकारितया प्रतिभागं न दीधिम नकार उपमा
र्थीयः प्रतिपुरुषं भागमिव दीधिमः अवस्थापयामः दधातेरेतद्रूपमधीयते॥ मं॥ अद्या देवाऽइति॥ हे सूर्यस्य देवाः रश्मयः उ
दिताः उदयकालीनाः अद्य अंहसः पापात् निःपिपृत निर्मुंचत निर्मोचयत अस्मानिति शेषः अवद्यात् निःपिपृत अवद्यं
अवाच्यं तत्‌हेतोः मित्रः वरुणश्च मामां महताम् पूजयतां उत अपि च अदितिः सिंधुः पृथिवी द्यौश्च मंहतां पूजयंतु आ
कारौ विसर्गलोपश्छांदसः आकृष्णेनेति देवपूजायामनुध्येयं अंगानि व्याख्यातानि नमस्त इत्यादि षोडशर्चमेगम्भूतं
शतरुद्रियप्रसंगेन व्याख्यातव्यं अथ शतरुद्रियं व्याख्यायते॥ मं॥ नमस्ते रुद्र मन्यवऽइति॥ रुद्रं उपसांत्वयति हे रुद्र ते
तव मन्यवे क्रोधाय नमः उत समुच्चये अपि च ते तव इषवे नमः इषवेपि नमः इत्यर्थः [illegible]त अपि च ते तव बाहुभ्यां नमो।
स्त्विति सर्वत्राध्याहार्यं सर्वत्र वाक्यं क्रियया परिसमाप्यत इति न्यायात्॥ मं॥ या ते रुद्र शिवेति॥ गिरिशंतऽइति गिरौ पर्वते कै
लाशे स्थितः शं कल्याणं तनोतीति गिरिशंतः यद्वा गिरौ मेघे स्थितः शं तनोतीति वृष्टिद्वारा हे गिरिशंत तया तन्वा नः अ।

स्मानऽभिचाकशीहि पश्य अभि याचाकशि पश्यति कर्म तन्वा किंभूतया शंतमया कल्याणतमया तया कया या ते तव हे रुद्र।
शिवा शांता अघोराऽविषमा अपापकाशिनी तनूः पापमसुखं काशयति पापकाशिनी न पापकाशिनी अपापकाशिनी॥ यामिषुं
गिरिशंतेत्यादि॥ हे गिरित्र तां इषुं शिवां कल्याणप्रदां कुरु तां कां हे गिरिशंत यामिषुं अस्तवे असितुं हस्ते बिभर्षि गिरित्र इति।
गिरौ कैलासे स्थितः त्रायते भूतानिति गिरित्रः किंच पुरुषं जगत् जंगमादिकं चान्यदपि मा हिंसीः मा नाशय॥ शिवेन वचसे
ति हे गिरिश शिवेन वचसा त्वा त्वां तथा अच्छा वदामसि अभिवदामः अच्छा पूर्वो वदतिरभिवादने वर्त्तते इति शाकपूणिः
गिरौ शेते इति गिरिशः तथा कथं यथा नः अस्माकं सर्वमित् सर्वमेव जगत् जंगमादि अयक्ष्मं व्याधिरहितं असत् भूयात् सु
मनाः शोभनमनस्कं च भूयात् इ छन्द एवार्थे यक्ष्मा व्याधिः॥ अध्यवोचदधीति॥ अधिशब्द उपरिभावमैश्वर्यं च वदति अ
धिवक्ता ऐश्वर्येण वक्ता रुद्रः कमपि निजपुरुषं अध्यवोचत् ऐश्वर्येणाऽवदत रुद्रः किंभूतः प्रथमः दैव्यः देवसंबंधी
भिषक् हितकर्त्ता किं अवदत सर्वान् हीन सर्पान् जंभयन् नाशयन् सर्वाश्च यातुधान्यः राक्षसी जंभयन् अधराचीः अधो
गतीः कृत्वा परासुव परिक्षय जभ जृंभी गात्रविनामे यद्वा रुद्रमेव प्रति उच्यते हे रुद्र भवानऽध्यवोचत् अधिब्रवीतु मंग
लमिति शेषः किंच भवान् अहीन यातुधान्यश्च परासुव परिक्षिपतु अन्यत्समानं॥ असौ यस्ताम्र इति॥ आदित्यरूपेण रु

मं.र्थ. द्रः स्तूयते अभिनयेन दर्शयन्नाह अस्यादित्यरूपरुद्रस्य हेडः अपराधं अवईमहे अवनयामि अवशब्दोत्र व्यवहितो
दी. न्वेति येच एनं सूर्यरुद्राः रश्मिरूपाः सहस्रशः सहस्रसंख्याः दिक्षु अभितः सर्वतः श्रिताः आश्रिताः तेषांच हेडः अ
१८ वनयामि असौकः यस्ताम्रो लोहितः उदयकाले अस्तमयकाले च अरुणः स्वल्पलोहितः बभ्रुः कपिशः सुमंगलः शो
भनरूपः क्रमेणैतानि रूपाणि दधातीत्यभिप्रायः यद्वा रुद्रेण वोच्यते असौ यस्ताम्रः अरुणः बभ्रुः सुमंगलः प्रयोजनव
शात् नानारूपाणि करोतीति यद्वा क्रोधनेताम्रः क्रमात् क्रोधह्रासेन यादृशं रूपं जायते तादृशमाशास्यते॥ असौ योवसर्प
दृश्रः तीति॥ स। आदित्यः नः अस्मान् मृडयति सुखयति मृड सुखने सः कः योसौ अवसर्पति अवाचीनं गच्छति अस्तमय
सन्४६ तइत्यर्थः असौ किंभूतः नीलग्रीवः नीलग्रीव इव अस्तमनकाले तथैव दृश्यत इत्यभिप्रायः पुनः किंभूतो विलोहितः
अतिशयेन लोहितः किंच एनं गोपाः अपि अदृश्रन् पश्यंति उतशब्दोप्यर्थः गवां प्रवेशकालं मन्यमाना इत्यभिप्रायः किंच एनं
उदाहार्य्यः उदकहारिण्यः अदृश्रन् आगोपालांगनादिप्रसिद्ध इत्यर्थः अत्यंतमृदुहृदयत्वमस्य व्यज्यते तथा च यः स
र्वजनसुप्रसिद्धसुखसंबंधमेव जनयति न तु दुःखमिति भावः यद्वा ऋषिभिः रुद्रः साक्षादेव स्तूयते असौ कः यः अ
वसर्प्पति अभिमुखमागच्छति मृडयति सुखयति किंभूतः नीलग्रीवः नीलकंठः विलोहितः विगतकल्मषभावः। ४४

दृश्रः सन्४६

उतैनमित्यादि समानं ॥ मं॰ नमोस्तु नीलग्रीवायेत्यादि ॥ नीलग्रीवाय नीलकंठाय नमोस्तु किंभूताय सहस्राक्षाय बहुक्षाय मीढुषे सेक्ते
तरुणायेत्यर्थः मिह सेचने परिमाणितेन मूत्र्यते इति भावः अथो अपि च रुद्रस्य ये सत्वानः सत्वभूताः बलभूताः अर्थात् रुद्राः
तेभ्योऽहं नमः अकरं नमस्कारं करोमि ॥ मं॰ प्रमुंच धन्वन इति ॥ हे रुद्र त्वं धन्वनः धनुषः आर्त्न्योः धनुरंतयोः ज्यां प्रत्यंचिकां प्रमुंच दू
रिकुरु च पुनः यास्ते हस्ते इषवः कांडानि हे भगवः भगवन् ताः इषूः परावप पराक्षिप वहिः क्षिपेत्यर्थः ॥ मं॰ विज्यं धनुरिति ॥
अस्य कपर्दिनो रुद्रस्य धनुः विज्यं अस्तु विगतगुणं भवतु वाणवान् इषुधिः विशल्यो अस्तु विगतफलोऽस्तु शल्यः फलं वाणाग्र।
सेतीति वाणवान् अत अपि च अस्य या इषवः शराः ताः अनेशन् नष्टा भवंतु णश अदर्शने किंच अस्य निषंगधिः खड्गको
शः आभुः रिक्तोस्तु निषज्यते इति निषंगः खड्गः निधीयते अत्रेति निषंगधिः खड्गकोशः ॥ मं॰ या ते हेतिरिति ॥ हे मीढुष्टम हे सेक्तृ
म हे युवन् या ते तव हस्ते हेतिः धनुः बभूव स्थिता तया हेत्या अस्मान् विश्वतः सर्वतः त्वं परिभुज परिपालय किंभूतया हे।
त्याऽयक्ष्मया व्याधिरहितया ॥ मं॰ परि ते धन्वनो हेतिरिति ॥ हे रुद्र ते तव धन्वनः धनुषः हेतिः आयुधं कांडलक्षणं नः अस्मा।
न्परिवृणक्तु परिमार्जयतु विश्वतः सर्वत्र ना अथो अपि च यस्तव इषुधिः वाणवान् तं अस्मत् अस्मत्तः आरे दूरे निधेहि।
स्थापय ॥ मं॰ अवतत्येति ॥ हे सहस्राक्ष हे शतेषुधे त्वं धनुः धनुषं अवतत्य अवतार्य शल्यानां फलानां मुखा मुखानि शीर्य्य शी

76

धीः किंच नः प्रियास्तन्वः तनुः शरीराणि मारीरिषः मा नाशय ॥ ४ ॥ २=४
रिषतिर्हिंसार्थः तथाच मम पुत्रपौत्रादीनां च शरीराणि मा व ४ ६ ॥ मं॰

मं॰ रु॰ टी॰ ८५ णानि कृत्वा नोऽस्माकं शिवः शांतो भव सुमनाः शोभनमनस्कश्च भव नमस्त आयुधायेति हे रुद्र तव आयुधाय धनु
षे नमोऽस्तु धनुषे किंभूताय अनाततायाऽवतारिताय धृष्णवे धर्षणशीलाय अशल्यायेत्यर्थः उत अपि च तव उभा
भ्यां बाहुभ्यां नमः धन्वने च नमः पुनः पुनर्नमस्कार आदरातिशयार्थः मानो महांतमिति हे रुद्र नः अस्माकं महांतं वृ
द्धं मा वधीर्मा नाशय वृद्धं वयः प्रभृतिभिः उत अपि च नोऽस्माकं अर्भकं बालकं मा वधी उत अपि नः उक्षंतं सिंचं
तं गर्भमिति यावत् तरुणं मा वधीः उक्षसेचने उत अपि च नः पितरं मा वधीः आदरार्थं पुनरुपादानं महांतं यदेनै
व लब्धत्वात् उत मातरं मा वधीरित्यर्थः मानस्तोक इति हे रुद्र नोऽस्माकं तोके पौत्रविषये तनये पुत्रविषये मा रीरिषः
मा हिंसीः नः आयुषि विषयभूते च एवं गोषु अश्वेषु मा रीरिषः किंच हे रुद्र नः वीरान्मा वधीः किंभूतान्वीरान्भामि
नः क्रोधिनः भामः क्रोधो अस्य प्रत्युपकारः तमतत्वमाह हविष्मंत इति हविष्मंतः हविषा संयुक्ता वयं सदं सदा स
दाकालं त्वामित् त्वामेव हवामहे आहूयामः यागार्थं अनन्यशरणा इत्यर्थः इत् इद् एवकारार्थे नमो हिरण्यबाहवः इति
अतः परं तिस्रोऽशीतयो रुद्राणां द्वयोर्द्वयोः रुद्रयोर्नमस्कारः काण्डिकायां कांडिकायां अष्टौ रुद्राः ते षु ये अशांत ।
२५०

८५

तराः तेषांचउभयतो नमस्कारः ॥ नमोहिरण्यवाहव इति ॥ हिरण्यालंकारभूतवाहवे रुद्राय नमोस्तु किंभूताय सेनान्ये सेनां
नयतीति सेनानीः तस्मैसेनान्ये दिशांचपतयेनमः वृक्षेभ्यो वृक्षरूपेभ्यो रुद्रेभ्यो नमः किंभूतेभ्यः हरिकेशेभ्यः हरितानिप
र्णानि केशाइव येषांते हरितकेशाः तेभ्यः पशूनांपतये नमः ॥ नमः शिष्पिंजराय नवप्ररूढानि तृणानि शष्पं तद्वद्वर्ण
य त्विषिमते त्विषी त्विट् दीप्तिः तद्वते पथीनां पतयेनमः पथामिति प्राप्ते छांदसं रूपं नमो हरिकेशाय हरितकेशायउपवीति
नेयज्ञोपवीतिने पुष्टानां पतयेनमः अत्रनमः शब्दसंवद्धयदातिरिक्तानि पदानि विशेषणानि ज्ञेयानि एवंसर्वत्र ॥ नमो बभ्रुशा
येति ॥ बभ्रुशाय बभ्रुवर्णाय रुद्राय नमः बभ्रुः कपिशः व्याधिने विध्यतीति व्याधिः तस्मै अन्नानां पतयेनमः नमोभवस्य
हेत्यै जगतांपतयेनमो नमः भवः संसारः तस्यहेतिरायुधं तस्मै संसारछेदकायेत्यर्थः जगतां पतयेनमः नमोरुद्रा
य आततायिने आततेन धनुषा पततीति आततायी तस्मै उद्यतधनुषे इत्यर्थः क्षेत्राणां पतये नमः सूर्योदयास्तमन
मध्यभूमिः क्षेत्र शब्देनोक्तेति केचित् नमः सूताय सूतः सारथिः सूताय किंभूताय अहंत्यै अहंत्रे नहि सूतः कम
पि हंति वनानां पतयेनमः ॥ नमो रोहितायेति ॥ रोहिताय रोहितवर्णाय रुद्राय नमः स्थपतये गृहादिनिर्माणकर्त्रे वृक्षाणां
पतयेनमः नमो भुवंतये भुवं पृथिवीं तनोति विस्तारयति इति भुवंति स्तस्मै वारिवस्कृताय वरिसेवनं तत्कृतं येन सवा
रिवस्कृतः तस्मै दीर्घत्वं छांदसं औषधीनां धान्यादीनां पतये नमः नमो मंत्रिणे वणिजाय वणिगेव वाणिजः कक्षाणांप

म॰ यु॰ दी॰ ४६ तयेनमः कक्षोनदीकक्षः पर्वतकक्षोवा नमः उच्चैर्घोषाय महाशब्दाय आक्रंदयते आक्रंदः प्रसिद्धः पत्तीनां पतये
नमः हस्त्यश्वरथपदातिभिः पत्तिरित्युवटः नमः कृत्स्नायतयेति कृत्स्नायतयाहेतुभूतया धावने रुद्राय नमः।
कृत्स्नश्चासावायतश्चेति कृत्स्नायतः तस्यभावः कृत्स्नायतता तया अर्थात् धनुषा तकारलोपः छांदसः आकर्णपरि
पूरितेन धनुषा इत्यर्थः सत्वनां पतये नमः आकारलोपः छांदसः नमः सहमानाय अभिभवनशीलाय निव्याधिने नित
रां विध्यतीति निव्याधि तस्मै आव्याधिनीनां सेनानां पतये नमः आविध्यंतीत्याव्याधिन्यः नमो निषंगिणे खड्गयुक्ताय क
कुभाय महते ककुभ इति महन्नामसु पठंति स्तेनानां पतये नमः स्तेनश्चौरः नमो निचेरवे नितरां चरतीति निचेरुः
परिचराय परितश्चरतीति परिचरः सर्वतोगंता आरण्यानां पतये नमः नमो वंचते परिवंचते इति वंचतिर्गत्यर्थः वं
चते गमनशीलाय परिवंचते सर्वतोगमनशीलाय वंचते वंचकाय परिवंचते प्रकाशतस्करायेति केचित् नम इति
सर्वत्र योज्यं स्तायूनां पतये नमः स्तायुः चौरविशेषः नमो निषंगिणे खड्गिने इषुधिमते इषुधिः तूणः तस्कराणां पत
येनमः तस्करश्चौरविशेषः नमः सृकायिभ्यः सृक इति वज्रनामसु पठितं सृकेन गृहीतेन एतुं शीलमेषामिति सृकायि।
नः जिघांसद्भ्यो हंतुमिच्छद्भ्यः मुष्णतां पतये नमः मुष्णतां चोराणां मुषस्तेये नमो असिमद्भ्यो असियुक्तेभ्यः नक्तंचर। ४६

वे×२

ऽभ्यः रात्रौ गच्छद्भ्यः विकृन्तानां विकर्त्तनशीलानां पतये नमः ॥ नमः उष्णीषिणे इति । उष्णीषिणे नमः उष्णीषमस्यास्यास्तीति ।
उष्णीषी उष्णीषं शिरोवेष्टने गिरिचराय पर्वतसंचारिणे कुलुंचानां पतये नमः कुत्सितं लुंचेति कुलानि वा लुंचेति कुं पृथिवीं लुं
चेतीति केचित् नमइषुमद्भ्यो धन्वायिभ्यश्च वो नमः वः युष्मभ्यं नमः केभ्यः ये यूयं इषुमंतः तेभ्यः धन्वायिभ्यः धनुषा
एतुं शीलं येषामिति धन्वायिनः वासज्ञायामिति धनुषो नङ् चकारः समुच्चयार्थः नमआतन्वानेभ्यः उत्क्षिप्तकांडानि धनूं
षि कुर्वाणेभ्यः प्रतिदधानेभ्यश्च वो नमः प्रतिदधानाः संधानं कुर्वाणाः नमआयच्छद्भ्यः धनूंषि आयतानि कुर्वद्भ्यः अस्य
द्भ्यश्च वो नमः अस्यद्भ्यः कांडानि क्षिपद्भ्यः असु क्षेपणे ॥ नमो विसृजद्भ्य इति विसृजद्भ्यः कांडानि योद्धारं प्रतिक्षिपद्भ्यश्च ।
वः नमः विध्यद्भ्यः शत्रून् ताडयद्भ्यः नमः स्वपद्भ्यः स्वापं कुर्वद्भ्यः जाग्रद्भ्यश्च वो नमः नमः शयानेभ्य आसीनेभ्यश्च
नमो नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमः एतानि पदानि गदव्याख्यानानि अतः परं अद्वैतप्रतिपादनाय स्तुतिः नमः स
भाभ्यः सभापतिभ्यश्चेति वो युष्मभ्यं नमः केभ्यः सभाभ्यः सभापतिभ्यश्च सभास्वामिभ्यः नमः अश्वेभ्यः अश्वपति
भ्यश्च नमः आव्याधिनीभ्यः आविध्यंतीति आव्याधिन्यः सेनाः ताभ्यः विविध्यंतीभ्यः विशेषेण विध्यंतीति विविध्यंत्यः ।
सेनाः नमः उगणाभ्यः उद्भूतगणाभ्यः सेनाभ्य एव उत् उपसर्गस्य उत्य लोपः छांदसः तृंहतीभ्यश्च वो नमः तृंहती हिं

४०

म॰ध॰ साकर्महिंसतीभ्यः सेनाभ्यः एव तृंहणं वज्रादिप्रहारः पोथनं मुशलादिप्रहारः घातः खड्गादिप्रहारः इति हिंसाया एव भेदाः
दी॰ ॥नमो गणेभ्य इति॥ नमो गणेभ्यः गणाः समूहास्तेभ्यस्तत्स्वरूपेभ्यो नमः गणपतिभ्यश्च वो नमः नमो व्रातेभ्यः व्रातं समूहं मर्ह
४८ न्तीति व्राता गणपतिविशेषा एव व्रातपतिभ्यश्च वो नमः नमः गृत्सेभ्यः गृत्सो मेधावी गृत्सपतिभ्यश्च वो नमः नमः विरूपे
भ्यो विकटरूपेभ्यः विश्वरूपेभ्यश्च वो नमः विश्वरूपेभ्यः सर्वरूपेभ्यः ॥नमः सेनाभ्य इति॥ सेना चमूस्तत्स्वरूपेभ्यो नमः
सेनानीभ्यश्च वो नमः सेनां नयंतीति सेनान्यः तेभ्यः नमो रथिभ्यः रथा येषां संति ते रथिनः अरथेभ्यः अरथाः रथवर्जि
ता योद्धारः नमः क्षत्तृभ्यः रथानामधिष्ठातारः क्षत्तारः संगृहीतृभ्यश्च वो नमः संगृहीतारः सारथयः नमो महद्भ्यः म
हांतो जातिविद्यादिभिरुत्कृष्टाः अर्भकेभ्यश्च वो नमः अर्भकोऽल्पकः प्रमाणादिभि ॥नमस्तक्षभ्यो रथकारेभ्यश्च वो न
म इति॥ नमस्तक्षभ्यो रथकारेभ्यश्च रथकारास्तक्षविशेषः नमः कुलालेभ्यः कुलालाः कुंभकाराः कर्मारेभ्यः कर्मारा लो
हकाराः नमो निषादेभ्यः निषादाः मांसिकाः धीवराः पुंजिष्ठाः जात्यंतरसंकीर्णाः संकरादयः पुल्कसादयः नमः श्व
निभ्यः श्वनो नयंतीति श्वनयः तेभ्यः नयतेर्ह्रस्वत्वं छांदसं वागुरिका इति यावत् मृगयुभ्यश्च वो नमः मृगान्कामयंत इ
ति मृगयवः व्याधाः इदं युः इदं कामयत इति यास्कः तेभ्यो मृगयुभ्यो वो नमः नमः श्वभ्यः श्वपतिभ्यश्चेति उभयतो न
मस्काराः समाप्ताः नमः श्वभ्यः श्वपतिभ्यश्च वः युष्मभ्यं नमः इति उत्तरं रुद्रनामानि नमो भवाय च रुद्राय नमः श

४८

वीयच पशुपतयेच नमो नीलग्रीवाय श्यामकंठाय श्वेतकंठाय शितिशब्दः श्वेतपर्य्याय इत्युवटः॥ मं नमः कपर्द्दिने इति॥ कप
र्द्दिने जटाजूटधारिणे नमः व्युप्तकेशाय विशेषेण उप्ताः मुंडिताः केशाः यस्य सः व्युप्तकेशः तस्मै नमः सहस्राक्षाय बहु
क्षाय शतधन्वने बहुधन्वने नमो गिरिशयाय गिरौ शेते गिरिशयः तस्मै शिपिविष्टाय शिप इव निर्वेष्टितः स्वनतिरभिधेयः
यद्वा उदितमात्र आदित्य स्यूयते शिपिशब्देन निष्टेन वाणरश्मयः उच्यंते नमो मीढुष्टमाय सेक्तृतमाय यूने परिणाम र
हिताये त्यर्थः इषुमते वाणसंयुक्ताय मं नमो ह्रस्वायेत्यादि॥ रूपतो नमस्काराः नमो ह्रस्वाय च ह्रस्वो लघुप्रमाणः वामनाय संकु
चितावयवाय नमो बृहते च वर्षीयसे च बृहते महते वर्षीयसे वृद्धतराय नमो वृद्धाय वृद्धः प्रसिद्धः सवृधे तेन समान।
वयसे नमो ऽग्र्याय च प्रथमाय च अग्रे भवोग्र्यः प्रथमो मुख्यः मं नमः आशवे इति॥ आशवे च अजिराय च नमः द्वे प्रविशी
घ्रनामनी अश्नुते इत्याशुः अध्वनो व्यापकः अजतीति अजिरः अजगतिक्षेपणयोः नमः शीघ्र्याय च शीभ्याय च शीघ्रशी
भौ क्षिप्रनामनी छांदसो य प्रत्ययः अधिष्ठातृदेवतावचनः अग्रेप्येवं बोद्धव्यं नमः ऊर्म्याय च अवस्वन्याय च ऊर्मिर्ज।
लकल्लोलः अर्वाचीनं गच्छतः उदकस्य स्वनो ध्वनिः अवस्वनः नमो नादेयाय च द्वीपाय च नद्यां भवो नादेयः द्वीपे भवो
द्वीप्यः द्वीपं नद्योर्मध्ये निरूदकप्रवेशः नमो ज्येष्ठायेति वयोवस्थाभिप्रायाः षट् नमस्काराः नमो ज्येष्ठाय कनिष्ठा।

मं॰यं॰ यच नमः पूर्वजाय चापरजाय च पूर्वोजातः पूर्वजः अपरोजातः अपरजः मध्येभवो मध्यमः अपगर्भोऽपगल्भः
टी॰ एकगर्भान्तरितः अव्यवहितः कनिष्ठः नमोजघन्याय च बुध्न्याय च जघनं पश्चाद्भागः बुध्नं आदिभागः तत्रभवः नमः सो
४८ भ्याय च प्रतिसर्याय इति नमः सोभ्याय च सोभ इति गंधर्वनगरं सुभमयमिति वा तत्रभवः अभिचारकर्म प्रतिसरः तत्करोति
तदाचष्टे वा नमो याम्याय च क्षेमाय च यामः प्रहरः क्षेमकुशलं नमः श्लोक्याय चावसान्याय च श्लोकः शब्दः अवसानं
समाप्तिः नमउर्वर्य्याय च खल्याय च उर्वरं यत्तातये सरितयोरंतरं खलो धान्यखलः "नमो वन्याय च कक्ष्याय चेत्यादि वनं वृ
क्षसमूहः उदकं वा कक्षः नदीकक्षः पर्वतकक्षो वा नमः श्रवाय च प्रतिश्रवाय च श्रवः शब्दः प्रतिश्रवः प्रतिशब्दः नमः
यं॰ आशुषेणाय चाशुरथाय च आशुषेणः आशुसेनः आशुरथः शीघ्ररथः नमः शूराय चाऽवभेदिने च शूरः शरभेदी
शारते रूपं अवाचीनं भेतुं शीलमस्येत्यवभेदी "नमो विल्मिने चेति" विल्ममस्यामस्यास्तीति विल्मी विल्मं शिरस्त्राणं वि
ल्मं भासनमुत्तरांगमुच्यते कवचं यद्धृते स्यूतं तत्कर्पासगर्भं "नमो वर्म्मिणे च वरूथिने च वर्म्मलोहं कवचं वरू
थं हस्तिनउपरिगृहाकारः कोष्ठकः तद्वते नमः श्रुताय च श्रुतसेनाय च श्रुताय सर्वलोकहिताय श्रुतसेनाय
श्रुतासेना च मूर्यस्य तस्मै नमो दुंदुभ्याय चाहनन्याय च दुंदुभेभवः [illegible] दुंदुभ्यः आहननेभवः आ

चं॰३

हनन्य: तस्मै नमो धृष्णवइति ॥ नमो धृष्णवे च धृष्णु: प्रगल्भ: प्रमृशाय सर्वं प्रमृशतीति इति प्रमृश: पंडित: नमो निषंगिणे
चेषुधिमते च निषंग: खड्ग: सोस्यास्तीति निषंगी इषवो धीयंते ऽत्रेति इषुधि: तद्वते नमस्तीक्ष्णेषवे चायुधिने च ती
क्ष्णा इषवोस्येति तीक्ष्णेषु: आयुधमस्यास्तीति आयुधी नम: स्वायुधाय सुधन्वने च स्वायुधाय शोभनायुधाय सु
धन्वने शोभनधनुषे नम: स्रुत्यायेत्यादि नम: स्रुत्याय च नद्या: एकदेशवाहिनी स्रुति: तत्र भव: स्रुत्य: पथि भ
व: पथ्य: नम: काट्याय च नीप्याय च काटे भव: काट्य: काट: कूप: नीचैर्गच्छंति यत्रापः स नीप: निम्नभूमि:
तत्र भव: नीप्य: नम: कुल्याय च सरस्याय च कुल्यायां भव: कुल्य: सरसि भव: सरस्य: नमो नादेयाय च वै
शंताय च नद्यां भवो नादेय: वेशंतस्तडागस्तत्र भव: वेशंत: नम: कूप्याय चेति ॥ नम: कूप्याय चावट्याय
च कूपे भव: कूप्य: अवटे भव: अवट्य: अवटो गर्त्त: नमो वीध्र्याय चातप्याय च विगतदीप्ति: वीध्र: इंधीदी
प्तौ घनागम इत्यर्थ: तत्र भवो वीध्र्य: आतपे भव: आतप्य: नमो मेघ्याय च विद्युत्याय च नमो वर्ष्याय चाऽ
र्षीय च वर्षे भवो वर्ष्य: अवर्षे भवो ऽवर्ष्य: नमो वात्याय च रेष्म्याय च वाते भवो वात्य: रेष्मणि भवो रेष्म:

सं॰ यं॰ टी॰ ४९

रेष्म हिंसाश्चिवति हिंसा यांश्चन्येभ्योपि दृश्यते इति मनिष् नमोवास्तव्या यच वास्तुपायच वास्तु गृहं तत्र भवो वास्तव्यः वास्तु पातीति
वास्तुपः नमः सोमाय च रुद्राय च नाम तो नमस्कारः नमस्ताम्राय चारुणाय च वर्णतो नमस्कारः नमः संगवे च पशुपतये च ग
वां शं सुखं करोतीति शंगुः पशूनां पतिः पशुपतिः नमः उग्राय च भीमाय उद्गूर्णः उग्रः भीमो भीषणः नमोऽग्रेवधाय च दूरेव
धाय अग्रे स्थितः हंतीति अग्रेवधः दूरे स्थितः हंतीति दूरेवधः नमो हंत्रे च हनीयसे च हंत्रे हननकर्त्रे हनीयसे अतिशयेन ह
ननकर्त्रे नमो वृक्षेभ्यो हरिकेशेभ्यः हरितानि पर्णानि केशा इव येषां तेभ्यो वृक्षेभ्यो नमः नमस्ताराय तारयति उत्तारयति सं
सारादिति तारः नमः शंभवाय च मयोभवाय च शं सुखं भवत्यस्मादिति शंभवः शम उपशमे धातुः समा सुखेन वा भाव
यतीति शंभवः यद्वा शं चासौ भवश्चेति शंभवः शं आनंदरूपः भवः कालदेशानवच्छिन्नभवनशक्तिः आनंदविज्ञानघन
रूप इत्यर्थः शंवमयोभवइति नमः शंकराय च मयस्कराय च शंकरोतीति शंकरः मयः करोतीति मयस्करः मयः सुखं
नमः शिवाय च शिवतराय च शिवाय शांताय निर्विकाराय शिवतराय निरतिशय सर्ववीजाय नमः पार्याय चावार्याय चे
ति नमः पार्याय च पारे भवः पार्यः अवारे भवः अवार्यः नमः प्रतरणाय चोत्तरणाय च प्रतरंति येन तत् प्रतरणं तरं
3= डुकादिलघुद्रव्यं किंचिदुत्तरं त्यनेनेति उत्तरं नौरुच्यते नमस्तीर्थ्याय च कुल्याय च तीर्थे भवः तीर्थ्यः कूले भवः कूल्यः

पुरस्तिरेव पुलस्तिः रलयोः सावर्ण्यात् ×४

नमः शष्प्याय च फल्याय च शष्पेन वतृणेभवः शष्प्यः फेनेभवः फेन्यः ॥ नमः सिकत्यायेति ॥ सिकतायां भवः सिकत्यः ।
प्रवाहेभवः प्रवाह्यः नमः किᳪं शिलाय च क्षयणाय च किमेतदुदकं हिमाभूतमुतशिलेति यत्र वितर्कः स किंशिलः अथवा
किंशिला कर्कत्वं चेति क्षयंत्यस्मिन्नापइति क्षयणः नमः कपर्द्दिने च पुलस्तये च कपर्दोस्यास्तीति कपर्द्दी पुरस्तिष्ठतिपु
भाङ्गुन दिदृक्षयाइति पुरस्तिः ॥ नमः इरण्याय च प्रपथ्याय च इरणेभवः इरण्यः इरणो निरूदकप्रदेशः प्रपथेभ
वः प्रपथ्यः ॥ नमो व्रज्याय चेति ॥ व्रजेभवो व्रज्यः व्रजो गोव्रजः गावस्तिष्ठंत्यस्मिन् इति गोष्ठः तत्र भवो गोष्ठ्यः नमस्तल्प्या
य च गेह्याय च तल्पेभवः तल्प्यः तल्पं शयनीयं गेहेभवः गेह्यः नमो हृदय्याय च निवेष्प्याय च हृदयेभवः हृदय्यः नि
ष्या: वेष्पेभवो निवेष्प्यः आवर्त्तः नमः काट्याय च गह्वरेष्ठाय च काटेभवः काट्यः काटः कूपः गह्वरेति सृतीति गह्वरेष्ठः गह्व
ट्या: क्ष्या= रं महदुदकं ॥ नमः शुष्क्याय चेति शुष्केभवः शुष्क्यः हरितेभवो हरित्यः हरितमार्द्रं नमः पांसव्याय च रजस्या
य च पांसुषु भवः पांसव्यः रजसि भवो रजस्यः नमो लोप्याय चोलप्याय च लोपेभवो लोप्यः उलपेभवः उलप्यः
उलप्येते उकारोर्यतेन तु लोप इवाश्रवणमुपैतीति उलोपः तकारलोपः छांदसः नमः ऊर्व्याय च [illegible] ।

= ट्य:

मं. ध. दी. ५० सूर्व्यायच ऊर्वीवाउ वाग्निः तत्रभवः ऊर्व्यः सएवशोभनः सूर्वः तत्रभवः सूर्व्यः नमः पर्णायच पर्णसदायच पर्णायपर्णस्व
रूपाय पर्णसदः पतितपर्णः पर्णावस्थानेवा नम उद्गुरमाणायचाभिघ्नतेच उद्गुरमाणः उद्यमनशीलः अभिघ्नतेअ
भिहननंकुर्वते नम आखिदतेच प्रखिदतेच आखिदते दीनभावंकुर्वते स्वभक्तानामितिशेषः प्रखिदते प्रकर्षेण दीनभावंकु
र्वते निषिद्धसेविनामितिशेषः नम इषुकृद्भ्यो धनुः कृद्भ्यश्च वोनमः इषून् निचये कुर्वन्तितेः इषुकृतः तेभ्योनमः येयूयंधनु
ः कृतस्तेभ्यो वो युष्मभ्यं नमः युष्मदादेशयोगात् प्रत्यक्षाएतेरुद्राः तिस्रोऽशीतयोरुद्राणांसमाप्ताः इदानींरुद्राणां
हृदयभूतानामग्निवायुसूर्याणांसंबंधीनियजूंष्युच्यंते नमोवः किरिकेभ्य इत्यादिना नमोवः किरिकेभ्यः वोयुष्मभ्यं नमः
वः केभ्यः किरिकेभ्यः कुर्वीदंजयंतनुराकार द्वारेणेति किरिका वाय्वग्निसूर्याः किंभूतेभ्यः देवानां हृदयेभ्यः देवानां
रुद्राणां अग्निवायुसूर्याणांहृदयभूतास्तेभ्य इत्यर्थः नमोविचिन्वत्केभ्यो नमोविक्षिणत्केभ्यः विचिन्वंति पृथक्कुर्वंतिधर्म
कारिणमधर्मकारिणंचेति विचिन्वत्काः विविधंक्षिणवंति हिंसंतिविक्षियंतीति वा विक्षिणत्का नम आनिर्हतेभ्यः आगत्य
हंतिगंत्यर्थः एते अग्निवायुसूर्याः सर्गादौएतेभ्योलोकेभ्यः आभिमुख्येननिर्हतानिर्गताइत्यर्थः द्रापेअंधसस्पतइतिसप्त
कंडिका एकरुद्रस्तुतिः द्रापेद्राकुत्सायांगतौ द्रापयतीतिभद्रापिः अथयथोक्तकारिणंकुत्सितांगतिंनयतीत्यर्थः हेअंधसः

87

सोमस्यपते हे दरिद्रनिष्परिग्रह हे नीललोहित नाक्नकारिणं कुत्सतो गतिनयतीत्यर्थः हे स्वंध सोमस्यपते हे दरिद्रनिष्परिग्रह
हे नीललोहित नामानि एतानि रूपाणि चेतिस्तुतिः एवं से वोध्य रुद्र मभयं याचते ग्रासां प्रजानां एषां पशूनां च ग्रस्मदीयानां
माभेः मा भेषीः मारोक् माभांक्षीः रुजोभंगे मोचनः किंचनाममत् उचसभ्रद्ध्येनः ग्रस्माकं किंच ग्रपत्यादिकं मामत्
मामीः मारुगणं कुरु ग्रमरोगे इमारुद्रायतवसेइति इमाः मतीवुद्धीः रुद्राय प्रभरामे हे प्रेरयामः याभिः स्तूयते इत्यर्थः
तथा प्रेरयामः यथा येन प्रकारेण द्विपदे मनुष्ये च नुष्पदे पशौ शं कल्याणं ग्रसत् भवतु रुद्राय किंभूताय तवसे तवकृ
ते तवशब्दो वलवचनः तूयद्धीय तपत् ग्राश्रयन् वीरोयत्र किंच विश्वं पुष्टं भवतु ग्रस्मिन् ग्रामे ग्रनातुरं ग्रापद्रहितं भ
वतु भावप्रधानो निर्देशः यातेरुद्रशिवेति हे रुद्र या ते तव शिवा शांता तनूः शरीरं तया तन्वा नः ग्रस्मान् मृडय सुखय जीवसे
जीवनाय तनूः किंभूता शिवा ग्रादरार्थं पुनः पुनर्वचनं विश्वाहा सर्वदा भेषजी भिषक्तेन सह वर्त्तते शिवा कल्याणरूत रू
पस्य या रुतीः रुद्र... भेषजी रुतशब्दो व्याधि वाचनः यद्वा शिवा रुतस्य फेरु शब्दस्य भेषजी ग्र
पशकुनहंत्रीत्यर्थः परिणो रुद्रस्येति रुद्रस्य हेतिः ग्रायुधं नः ग्रस्मान् परिवृणक्तु परिवर्जयतु परित्वेषस्य दुर्म
तिरघायोः ग्रघायोः पापशीलस्य दुर्मतिश्च नः परिवर्जयतु ग्रघायोः किंभूतस्य त्विषद्दीप्तो दीप्तस्य क्रुद्धस्येत्य।

२।४६ ३४५

मं.धी. र्थः अवस्थिरा मघवद्भ्य स्तनुष्व स्थिरा स्थिराणि धनूंषि मघवद्भ्यः मघवदर्थं अवतनुष्व अवतारय शिथिलीकु
दी. रु मघं धनं हविर्लक्षणं येषां तेभ्यो यजमानेभ्य इत्यर्थः किंच हे मीढ्वः सेक्तः तोकाय पौत्राय तनयाय पुत्राय मृड सुख
५१ य कर्म्मणि चतुर्थी ॥ मीढुष्टम शिवतमेति ॥ हे मीढुष्टम सेक्तृतम हे शिवतम नः अस्माकं शिवः सुमनाः शोभनमना
श्च भव किंच परमे दूरदेशावस्थायिनि वृक्षे आयुधं निधाय स्थापयित्वा कृत्तिं वसानः चर्म परिदधानः सन् आचर कर्मेति
शेषः पिनाकं दंडं बिभ्रत् आगहि आगच्छ ॥ विकिरिद्रेति ॥ हे विकिरिद्र विकिरः तिष्ठतः द्रापयतीति विकिरिद्रः हे विलोहित वि
गतकलुषभाव भगवः भगवन् ते नमः अस्तु यास्ते तव हस्ते हे भगवन् सहस्रं हेतयः आयुधानि संति ताः अस्मत् अस्म
त्तोऽन्यं पुरुषं निवपंतु भगव इति मतुः वसो रः संबुद्धौ छंदसीति विसर्जनीयः सहस्राणि सहस्रशः इति हे रुद्र ते तव बाह्वोः
प: याः सहस्रशः सहस्राणि हेतयः आयुधानि संति ईशानः त्वं तासां हेतीनां मुखा मुखानि पराचीनानि पराङ्मुखानि कृधि कुरु
पराङ्मुखानि वा सहस्रत्वप्रतिपादनाय शसप्रत्ययः ॥ असंख्याता सहस्राणीति ॥ हे रुद्राः असंख्याताः असंख्यातानि स
हस्राणि अधि भूम्यां भूम्युपरि स्थाः तेषां सहस्रयोजने अवस्थितानां धन्वानि धनूंषि अव तन्मसि अवतनुमः नमया
मः ॥ अस्मिन्महत्यर्णव इति ॥ अस्मिन्नंतरिक्षे ये भवाः रुद्राः अधि उपरि स्थिताः तेषामिति व्याख्याते अंतरिक्षे किंभूते।

प:४

र्णवेऽर्णः पानीयं तत उक्ते मत्वर्थीयो वकारः महति व्यापके ॥ नीलग्रीवा इति ॥ ये नीलग्रीवाः कृष्णकंठाः ये शितिकंठाः श्वे
तकंठाश्च ये रुद्रा दिवं द्युलोकं उपाश्रिताः तेषामित्यादि पूर्ववत् ॥ नीलग्रीवाः शितिकंठाः सर्वा युधः क्षमाचरा इति ॥ ये सर्वा रु
द्राः नीलग्रीवाः शितिकंठाः अधः क्षमाचराः पृथिव्या अधः संचरंति तेषामित्यादि व्याख्यातं ॥ ये वृक्षेषु शष्पिंजरा इति ॥ ये
रुद्रा वृक्षेषु आसते किंभूताः शष्पिंजराः शष्प इव पिंजराः पिंजरवर्णाः शष्पा नवतृणं नीलग्रीवा विलोहिताः विगतकलु
षभावाः विविधं लोहितं वा लोहितशब्देन धातव उच्यंते ते न इव लोहितमज्जादियुक्ता इत्यर्थः तेषामित्यादि ॥ ये भूतानामधि
पतय इति ॥ ये भूतानां प्राणिनां अधिपतयः ईश्वरा विशिखासः विशिखाः सर्वमुंडाः कपर्दिनो जटिलाः तेषामित्युक्तं ॥
॥ ये पथां पथिरक्षय इति ॥ ये रुद्राः पथां अधिपतयः मार्गाणां ईश्वराः ये च पथिरक्षयः पथां रक्षकाः इलानां अन्नानां समू
हः ऐलं ये बिभ्रति ते ऐलबृधाः आयुर्युधः आयुरेव पणीकृत्य ये युध्यंति ते आयुर्युधः चौरादयः रुद्राः तेषामित्यादि ॥ ये
तीर्थानि प्रचरंतीति ॥ ये रुद्राः तीर्थानि प्रयागप्रभृतीनि प्रचरंति संचरंति सृकाहस्ताः आयुधहस्ताः सृका इत्यायुध
नाम निषंगिणः निषंगवंतः तेषामित्यादि ॥ येऽन्नेषु विविध्यंतीति ॥ येऽन्नेष्ववस्थिताः विविध्यंति विशेषेण ताडयंति अय
मर्थः येषामयमधिकारः अन्नस्य भक्षयितारो व्याधिभिर्गृहीतव्याः इति ते ये च पात्रेष्ववस्थिताः पिबतो जनान्

विध्यंतीति तेषामित्यादि॥ य एतावंतश्चेति॥ य एतावंतः रुद्राः येच भूयांसः अर्थात् उक्तेभ्योपि बहुतरा रुद्राः दिशः वितस्थिरे
म॰ धी॰ टी॰ ५२ नाना दिक्षु निविष्टाः तेषामित्यादि पूर्ववत्॥ इतनुत्तरं त्रिभिर्मंत्रैस्त्रिस्थानस्थिता रुद्राः स्तूयंते॥ नमोऽस्तु रुद्रेभ्यो य इति तेभ्यो॥ रुद्रेभ्यो न
मोस्तु केभ्यः येदिवि द्युलोके स्थिताः येषां रुद्राणां वर्षं वृष्टिः इषवः आयुधस्थानीयाः तेभ्यो रुद्रेभ्यो दशांगुलीः प्रा
चीकरोमि नमस्कारार्थमिति शेषः एवं दशांगुलीः दक्षिणा दश प्रतीचीः दशोदीचीः दशोर्ध्वाः करोमीति सर्वत्रानुष
ज्यते तेभ्यो नमोस्तु तेनः अवंतु तेनः अस्मान् मृडयंतु सुखयंतु तेच वयं संतर्पित रुद्राः संतः यं पुरुषं द्विष्मः यश्चनः
अस्मान्द्वेष्टि तं एतेषां रुद्राणां जंभे मुखे दध्मः धारयामः॥ नमोस्तु रुद्रेभ्यो ये तरिक्ष इति॥ नमोस्तु रुद्रेभ्यो ये पृथिव्यामि
ति द्वे कंडिके उक्तार्थे॥ अथ नीलसूक्तं॥ वय ᳪ सोम व्रते तवेति॥ हे सोम तव व्रते वर्तमाना वयं तनूषु शरीरेषु जाग्रत्सुष
प्त्यादिषु मनः बिभ्रतः धारयंतः प्रजावंतः संतः सचेमहि सेवेमहि सेवितव्यानि वस्तूनीति शेषः॥ एष ते रुद्र भाग इति॥ त्र्य
तवोऽइव = ३ यंबकाः पुरोडाशाः॥ तवोऽइव = तत्र अवदान होमः॥ हे रुद्र एष ते तव भागः अंशः स्वस्रा भगिन्याम्बिकया सह तं भागं जुषस्व स्वाहा
तस्तु हुतमस्तु अतः परं आयूकापरिकिरिति॥ हे रुद्र ते तव आखुः मूषिका पशुः भागः अव रुद्रमदीमहीति॥
अवयुत्य पृथक्कृत्य अन्याभ्यो देवताभ्य इति शेषः रुद्रं अदीमहि आदयामः भोजयामः अदमत्क्षणेततः छोदसो

तवोऽइव = ३

कुर्य्या×२ 91

णिच् तस्य लोपः अवगत्य ज्ञात्वा तं देवं त्र्यंबकं च भोजयामः यथा नः अस्मान् वस्यसः वसीयसः वस्तृतरान् करत्
कुर्यात् वसनशीलादित्यर्थः वस निवासे इत्यस्य तृचि वस्तेइति भवति ततः छंदसीति ईयसुनि कृते वसीयस इति।
भवति यथा च नः अस्मान् श्रेयसः प्रशस्यतरान् करत् कुर्यात् यथा च नः अस्मान् व्यवसाययात् विशेषेण कर्म्मोत्त
रं प्रापयेत् षोंतकर्म्मणि इत्यवि पूर्वस्य च णि तस्याशिषि लिङ् आर्धधातुके यासुट् भेषजमसीति हे रुद्र यतस्त्वं स्वभा
वत एव भेषजं औषधं असि भवसि सर्वप्राणिनां हितकारी असि अतः प्रार्थ्यसे गवे अश्वाय पुरुषाय च भेषजं औषधं देही
तिशेषः मेषाय मेष्ये च सुखं देहि॥ त्र्यंबकं यजामहे इति वयं त्र्यंबकं शिवं यजामहे पूजयामः किंभूतं सुगंधिं मर्त्यदोषर
हितं पुष्टिवर्द्धनं पोषवर्द्धयितारं अतः सो अस्मान् मृत्योः संसारात् मुक्षीय मोचयतु पुरुषव्यत्ययः छांदसः कस्मादि
सार्धे कः८ मिव बंधनात् उर्वारुकमिव उर्वारुः कर्कटीविशेषः अनायासमोचने दृष्टांतः मामृतात् अमृतात् मोक्षान्मा मोचयतु
कुमार्य्यस्त्र्यंबकं प्रार्थयंते॥ त्र्यंबकं यजामहे सुगंधिं पतिवेदनमिति॥ त्र्यंबकं शिवं यजामहे पूजयामः किंभूतं सुगंधिं शोभ
नगंधिं पतिवेदनं पतिं वेदयति ददातिइति पतिवेदनः तं भर्त्तुर्लंभयितारमित्यर्थः विद्धुलाने किं प्रार्थयंते इतो ज्ञातिवर्गात्स
त्र्यंबकः मुक्षीय मोचयतु तत्र दृष्टांतः बंधनात् उर्वारुकमिव अमुतः पतिस्थानात् मामोचयतु॥ रा तते रुद्र इति रुद्र

सार्धे कः८

मं॰धी॰ दी॰ ५३ माजयति हे रुद्र ते स वरात अवसं पथिभ स्पंसं वलं तेन शंवलेन परः परस्तात् मूजवतः पर्वतात् त्वंप्रतीहि गच्छ मूजवा।
न्नामा पर्वतो रुद्रवसतिः कथंभूतो गच्छ अवततं विततंधनुर्यस्य स अवततधन्वा पिनाकावसः पिनाके अवसोय
स्यपिनाकोरुद्राकुशः रुद्राकुशकृतसंवल इत्यर्थः अहिंसन्नः अस्मान् अहिंसन् अनाशयन् शिवः भूत्वा अ
तीहि शिवः पूजितः सन् गच्छ पुनरुक्तिः त्वरार्थी॥ त्र्यायुषं यमदग्नेरिति॥ त्रीणि आयूंषि समाहृ तानि त्र्यायुषं बा।
ल्य यौवन स्थाविराणि तथा च यत् यमदग्नेः यच्च काश्य पस्य यत् देवेषु त्र्यायुषं तत् नः अस्माकं त्र्यायुषं अ
वे॰ स्त्विति आशीः प्रार्थने॥ शिवो नामासीति॥ हे क्षुर यस्त्वं शिवो नामासि ते स्वधितिः वज्रं पिता तेतस्मै ते नमः हे भगवन् मा
माहिंसीन् नाशय त्वया निवर्तयामि छेदयामि निपूर्वो वृत्तिः छेदने वर्त्तते किमर्थं आयुरर्थं अन्नाद्याय उ अन्नाय
उद्भिज्जाय च अन्नं च तदाद्यं चेत्यन्नाद्यं तस्मै प्रजननाय प्रकृष्टजननाय रायस्पोषाय रायो धनं तस्य पुष्टै सुप्रजास्त्वा
य शोभनापत्यतायै सुवीर्याय राष्ट्रे रुद्रेति अवसद्रेति च द्वे व्याख्याते [illegible] नमस्त इत्यादि षोडशाध्यायादौ व्याख्याते।
॥ नान्यः पन्था विद्यतेऽयनाय इति॥ इदानीं विश्वकर्मा मनुष्याणामुपदेशं करोतीति तं पुरुषं परमं यूयं न वि[illegible] दाथ न जानीथ तं कं य इ
मा इमानि भूतानि जज्ञान जनयति यत उपष्टंभनं भवति अतः कारणात युष्माकं तस्य पुरुषस्य अन्यत् महत्[illegible]

६३ ५३

क्ष्य = ५ ९३

अंतरं बभूव पुरुषो जनकः यूयं जन्याः पुरुषो ग्रामको यूयं ग्राम्या इत्यादि यदि ज्ञाता सत्येनोपास्यते तदा न संसारः
स्यात् तथा चायं भेदः संसारितमात्रकृत इत्यर्थः एवं प्रत्यक्तत्त्वं उक्त्वा अथेदानीं परोक्षममिनयेन दर्शयन्नाह नीहारेणेत्या
दि ये चैते नीहारेण अविद्यया प्रावृत्ताः अवगुंठिताः ये च जल्प्याः जल्पंते इति जल्पप्रवृत्ताः हेतुपक्षदृष्टांतैः आत्मज्ञानप्र
जल्पकाः तार्किका इति यावत् ये च असुतृपः असून् प्राणान् तर्पयंति ते असुतृपः देहात्मकाः नास्तिकाः ते वा यदेवां
तरं बभूव तदेव भवतामित्यर्थः ये च उक्थशासः उक्थानि यज्ञेषु यज्ञांगानि शंसंति ते उक्थशासः यज्ञशीलाः तेपि
पुरुषं प्रति चरंति विचलंति न जानंतीत्यर्थः ये तु पुरुषविदः ते पुरुषमेव यजंति तथा च पुरुष एव ज्ञातव्यः तेन संसृ
तिनाशो मोक्षः प्रभवतीत्यर्थः विश्वकर्मा ह्यजनिष्ट देव इति विश्वकर्मा आदित्यांतरपुरुषः अजनिष्ट जातः किंभू
तः देवः दानादिगुणयुक्तः आत् इत् इति निपातौ आनंतर्यार्थौ अनंतरं गंधर्वः अग्निर्द्वितीयोऽभवत् गां वाचं धार
यते गंधर्वः गां पृथिवीं धारयतीति वा गंधर्वशब्दोऽग्निवाचकस्तेन स्मृतावस्ति ओषधीनां जनिता यो लपिता पिता।
पर्जन्यः घनस्तृतीयोऽभवत् स उ स न्नः सन् अपां गर्भं व्यदधात् विशेषेण धारयति गर्भं किंभूतं पुरुत्रा बहु
नो त्रातामभवत् गर्भं किंभूतं पृथिव्यां पुरुत्रा बहुप्रकारकं नद्यादिरूपेणेत्यर्थः मीढुष्मेति चत्वारि व्याख्याता।

नि इति शतरुद्रियव्याख्या समाप्ता इति श्रीशत्रुघ्नकृतायां मंत्रार्थदीपिकायां षडंगव्याख्यानपरिच्छेदः अथ वैवाहि
कादयो मंत्राः तत्र प्रथमं अर्हणामंत्राः ॥ वर्ष्मोस्मीति ॥ अहं समानानां समानजातीयानां वर्ष्मः अस्मि आच्छाद
को भवामि केषां क इव उद्यतां उदयगामिनां चंद्रतारिकादीनां सूर्य इव किंच यः कश्चिद् मां अभिदासति हिन
स्ति तमिमं विष्टररूपतामापन्नं अभितिष्ठामि अभिभूय अधः कृत्वा तिष्ठामि अभिपूर्वो दासतिः हिंसायां वर्तते इति क
र्णभाष्यं ततो वरस्य पादप्रक्षालनमिति पारस्करः ॥ विराजो दोहोसीति ॥ हे जल त्वं विराजः विशिष्टदीप्तेः दोहः प्रपूर्णो
सि अहं विराजो दोहं विशिष्टदीप्तिप्रपूरकं त्वां अशीय गृह्णामि विराजो दोहस्त्वं मयि मम पाद्यायै पाद्याय भव तथा च
त्वामभिमंत्रयामि मम पादस्य विशिष्टदीप्तिं कुर्विति वाक्यार्थः ॥ अशीयेति ॥ अश गतिदीप्त्यादानेष्वित्यस्य धा
तोराशिषि लिङ् ॥ आपस्थेति ॥ हे आपः यतो यूयं आपस्थ आपो अवयं आप्नुवंतीत्यापः अतो हं युष्माभिः सर्वा
न्कामान् अवाप्नुवानि प्राप्नुयाम् आप इति आप्लृ व्याप्तावित्यस्य धातोः आप्नुवंतीत्यर्थे रूपं ॥ समुद्रमिति ॥ हे
आपः वो युष्मान् समुद्रं प्रहिणोमि प्रस्थापयामि मया प्रहिता यूयं स्वां योनिं समुद्रं अभिगच्छत यूयं किं नू ५४

ता: अस्माकं अरिष्टा: अहिंसका: वीरा अनुत्कृष्टा मत्पय: मदीयपानयोग्यं अत्पय: तत: पुन: मा परासेचि मत्तु रतेनापगच्छन्तु त
याच तदिहैव तिष्ठन्त्वित्यर्थ: मदीया: पानयोग्यातिरिक्ता: सर्वा: आप: ममाहिंसका: सत्य: समुद्रं गच्छन्तु मत्पानयो
ग्यपय: अत्रैव तिष्ठन्त्विति वाक्यार्थ: ॥ आमागन्यशसेति ॥ हे जल मां मां यशसा आगत आगमय मां यशस्विनं कुर्वि
त्यर्थ: किंच वर्चसा तेजसा मां संसृज संसृष्टं कुरु तथा तं मां प्रजानां प्रियं कुरु पशूनां गवादीनां अधिपतिं कुरु त
नूनां शरीरावयवानां अरिष्टं अपद्रहितं कुरु रिष्टिरापत् आगन्निति गमधातोर्लंतर भावितएं तस्य ले एमध्यमपु
रुषैकवचनं वाछन्दसीति विकल्पेन सेर्हिरादेशो न भवति मोनोधातोरिति मकारस्य नकार: ॥ मित्रस्यत्वेति ॥ हे मधुप
र्क मित्रस्य सूर्यस्य चक्षुषा त्वा त्वां प्रतीक्षे पश्यामि अहमादित्येन चक्षुर्दानेनानुगृहीत: त्वां मधुपर्कं पश्यामीति वाक्या
र्थ: ॥ देवस्यत्वेति ॥ हे मधुपर्क त्वा त्वां प्रतिगृह्णामि कस्मिन्सति सवितुर्देवस्य प्रसवे अभ्यनुज्ञाते सति सम्मतावितियावत् प्र
सूर्व: प्रवर्तिरभ्यनुज्ञाने वर्तते इत्युवटोगुणविष्णुश्च केन ग्रहणं अश्विनो: अश्विनीकुमारयो: बाहुभ्यां तथा पूष्ण: आदित्य
स्य हस्ताभ्यां तथा च तैरभ्यनुज्ञानादिभिरनुगृहीतो हं त्वां गृह्णामीति वाक्यार्थ: ॥ नमस्यावेति ॥ मधुपर्कप्रत्याह हे नमस्य
नमस्कारार्ह श्यावास्याय अन्नशयाय अन्नमिश्रयामि त्वामित्यध्याहार्य किंच ते तव अन्नशने भोजने यत् आविद्धं अनुपहितं तत् नि:

आ. ए. ६ 98

म.थी.
टी.
५५

कृताभि अपसारयामि अवास्यायानीति इयेङ् गताविस्यस्मात् अवपूर्वादाङ् पूर्वाच्च निष्पन्नमर्थः वर्णागमो वर्णविप
र्यश्चेति प्रथमसकारस्थाने शकारः अग्रिमसकारस्थाने छांदसात्विसर्गश्च यन्मधुनो मधव्यमिति मधुनो यन्मध
व्यंमधुरं परमुत्कृष्टं अन्नाद्यमिव यथा अन्नाद्यमुपभुक्तं बलादिकमादधातीति तथारूपतेन मधव्येन इत्यत्र द्वितीया
र्थे तृतीया तथा च तं मधुनः मधव्यं परमं अन्नाद्यं च रूपमहं असानि अश्नामि भक्षयामि मधव्यमित्यादि पुनर्विशेष
णमादतिशयार्थं अहं किंभूतः परमुत्कृष्टः मधव्यः मधुरशीलः अन्नादः अन्नमत्तीत्यन्नादः वाङ्म आस्ये इति
मे मम मुखे वाक् वचनमस्तु मे मम नसोः नासिकयोः प्राणः श्वासवायुः अस्तु मे मम अक्ष्णोः नेत्रगोलकयोः चक्षुरिंद्रि
यमस्तु कर्णयोः कर्णशष्कुल्योः श्रोत्रमिंद्रियमस्तु बाह्वोर्बलं सामर्थ्यमस्तु ऊर्वोरोजः पटुत्वमस्तु अंगानि शि
रः प्रभृतीनि अरिष्टानि आपद्रहितानि संतु भवंतु मे मम तन्वा शरीरेण सह तनूः शरीरावयवाः अरिष्टाः संतु अनेन
स्पर्शनेन मम मुखाद्यवयवेषु वचनादिशक्तिर्भवतु आपत्शून्यता च भवतीति वाक्यार्थः गोस्तुति माता रुद्राणामिति
ति अतोऽहं यजमानश्च चिकितुषे जिज्ञासमानाय शुश्रुषवे जनाय प्रणवोचं अत्र नमाडंश्या गदत्यादि नाअजाग

५५

वस्त्रपरिधानमंत्रः ६

मनिषेधः पुनः पुनरुक्त्वा नास्मि अत्र शुश्रूषवे न चोपदेष्टुमर्हतीति चिकित्सेइत्युक्ते किं वदसि उक्त्वा मा गां वधिष्ठाः
हिंसीः गां किंभूतां अनागां अनपराधां अदितिं दितिः खंडनं हिंसा सा यस्या नास्ति सा अदितिः किंच यतः सा रुद्राणां माता
वसूनां दुहिता आदित्यानां स्वसा अमृतस्य देवानां भक्ष्यस्य नाभिः उत्पत्तिस्थानं एतावतापि सर्वेषां हिंसेति भावः मम
चार्हणीयस्य अमुष्य चार्हणकर्त्तुः पाप्मा पापं हतः हतं ओमिति स्वीकारे अतु उत्सृजत गां मद्वचनात् पश्चान्मुंचतेत्यर्थः
प्रणवोच्चमित्यत्र प्रावोचमिति शब्दात् तु उत्सृजेत्यर्थः इति एतावतापि छांदसत्वादकारलोपः तदनंतरं तृणान्यत्तु उदकास
तीं तृणानि खादतु अत्राशंसा वाक्यार्थः जरां गच्छेति हे आयुष्मति कन्यके जरां गच्छ चिरजीविनी भवेत्यर्थः वासः प
४ वस्त्रपरिधानमंत्रः ४
रिधत्स्व वस्त्रं परिधेहि वस्त्रवियुक्ता न कदाचिदपि भवेत्यर्थः आकृष्टीनां भव आकृष्टी भव प्रथमायां षष्ठी आकृष्टी
मनोहरा अभिशस्तिपावाः अभिशस्तिः शयने तत्र पावा भव पवित्रा भव किंच शरदः वर्षाणां शतं जीव किंभूता सु
वर्चा शोभनदीप्तियुक्ता किंच रयिं धनं अनुसंव्ययस्व संवृणु धारयेत्यर्थः न केवलं धनं पुत्रांश्च धारय अत्रायुष्मा
शंसैव वाक्यार्थः ॥ या अकृंतन्नवयन्निति ॥ हे आयुष्मति या देवीः देव्यः तन्तून् अकृंतन् कर्त्तितवत्यः याश्च तन्तून् अवयन्
नप्रवत्यः याश्च अतन्वत विस्तारितवत्यः ता देवी देव्यः त्वा संव्ययस्व संव्ययंतु परिधारयंतु अर्पीतवासः तथा सति।

वस्त्रस्तुतिः ४२

मं॰ पं॰ दी॰ ५६

वेचइदं वासः ततंच विस्तारय अभितः सर्वतः ततः परिधत्स्व किमर्थं जरसे दीर्घायुत्वाय अवयन्निति व्येञ् तंतुसंताने
त्यस्य देवीरिति प्रथमाबहुवचने रूपं छंदसीति दीर्घत्वं ततं चेति तनुविस्तारे इत्यस्य लिटि संव्ययस्वेति तिङो तिङो भवं
तीति प्रथमपुरुषबहुवचने मध्यमपुरुषैकवचनं परिधास्ये इति अहं परिधास्ये परिधानं करिष्यामि हे तु हे तु मद्रा
वो बोद्धव्यः अनेन परिधानेन शरदः वर्षस्य शतं जीवामि पुरूचीः बहु तेजाः सन् रायस्पोषं धनसमृद्धिं अभिसंव्य
यिष्ये संव्ययिष्यामि धारयिष्यामीत्यर्थः किमर्थं दीर्घायुत्वाय चिरं जीवितायपरिधत्त किंच जरदृष्टिः वृद्धः अग्रे भ
विष्यामि अनेनेति शेषः संव्ययिष्य इति व्येञ संवरणे इत्यस्य रूपं कन्याप्रदानगोत्रोच्चारणे ततः वरयोरैकीकृत्य
कामस्तुतिकरणे पारस्करः समंजंत्विति विश्वेदेवाः नौ आवयोः हृदयानि हृदये समंजंतु संगमयंतु अपि च आपः
पानीयानि नौ हृदयानि समंजंतु पानीये नौ सर्गपूर्वकं तव मम हृदये संगतं भवतित्यर्थः तथा मातरिश्वा वायुः प्राण
वायुः नौ आवां संदधातु संयोजयतु तथा धाता प्रजापतिः नौ आवां संदधातु तथा नु देष्ट्री इच्छाकर्त्री देवता कामदेवः
नौ आवां संदधातु अत्र नु देष्ट्रीति इष इच्छायामित्यस्य तृच् पूर्वस्य तृचि छंदसत्वात् अयं प्रश्नः अत्रोत्तरं कामः अदा
त् कामाय अदात् कामो दाता कामः प्रतिगृहीता अत एव हे काम अभिलाष एतत्ते एतद्देयं वस्तु कन्यादिकं तव अत्र
तृइट् न भवति देवतानि प्रायेण स्त्रीत्वविवक्षायांङी ५६

कामशब्देनेच्छाभिधीयते यतइच्छायामेवसत्यांदीयतेप्रतिगृह्यतेच तथाच तत्प्राधान्यप्रतिपादनाय दातृत्वंप्रतिग्राहित्वंचका
मस्यैवोक्तं तेनकामस्तुतिरत्रकर्तव्येतिवाक्यार्थः॥ द्यौस्त्वाददातिति॥ व्यक्तार्थमेतत् एषचतात्पर्यार्थः हेकन्येतवायंपिता
आकाशमिववृष्ट्यादिद्वारासर्वोपकारकं यथाकाशंतद्वत् पितापि अहंपृथिवीवयथापृथवीसर्वाश्रयातथाहंत्वदाश्रयइ
त्यर्थः॥ यदैषिमनसेति॥ हेकन्येयतस्त्वंमनसादूरं ॥२॥ मे इमांगंधर्वायअददत् गंधर्वः इमांअग्नयेअददत् अग्निःअ
थोनंतरं इमांमह्यंअप्रदात् दत्तवान् नकेवलमिमां किंतु रयिंधनंअपिपुत्रांश्च पुत्रानपिमह्यमग्निरदात् दत्तवान् साइयं
नोऽस्मान्नेरयत् मारारयत् मात्यजतु किंभूता पूषावृद्धकरी शिवतमा कल्याणतमा यस्यांत्वयि उशतः कामयमाना
वयंशेफमिंद्रियंप्रहरामहि यामसांत्वंऊरूविहरजंघेप्रसारय किंभूता नोऽस्मान् उशतीइच्छंती किंचयस्यांत्वयि उ अहेव
हवः कामअभिलषितानिनिविष्टैनिनेशिताः सर्वप्रायश्चित्तमंत्राः स्नानप्रकरणेलिखिताः॥ ऋताषाडिति॥ सोऽग्निः गं
धर्वः गंधर्वरूपः तस्मैअग्नयेस्वाहावाट् यत्स्वाहाकृतं सुवृतं तत्तत् वाट् सुष्ठुवहत्वित्यर्थः अग्निः किंभूतः ऋताषाट् स
त्यसहकृतः पुनः किंभूतः ऋतधामा ऋतंसत्यंधामस्थानं यस्यसऋतधामा किमर्थंस्वाहाक्रियते इत्याह इदंब्रह्म।
ज्ञानंक्षत्रंवीर्यंचपातुरक्षतु॥ ऋताषाट्ऋतधामाग्निर्गंधर्वस्तस्यौषधयइति॥ योयमग्निर्गंधर्वरूपस्तस्याग्नेः।

मं. ब्रा. टी. ५०

गंधर्वस्य ओषधयो व्रीह्यादयः अप्सरसः गंधर्वाणाम् अप्सरसो भवंति किंभूता मुदो नाम मुदनाम्न्यः इत्यर्थः ताभिः स
र्वे मोदंते इति मुदः ताभ्यः स्वाहा सुहुतं भवतु तथा च ता अपि अस्माकं ज्ञानं वीर्यं च रक्षंतु इति वाक्यार्थः सऽहितो विश्व ।
सामेति यः सूर्यो गंधर्वसहितः दिवसं रात्रिं च संदधातीति संहितः विश्वसामा सर्वसामवेदमयः अपरं समा इति गच्छसि पि
तृकुलतो वहिर्भूता कुत्र ताके ननीये इति मनसा दूरं गच्छसि सोत्कंठा भवसीति यावत् तत्र दिशः प्राच्यादिदिशः वायु पव ।
मानो वायुश्च वा शब्दाः समुच्चये हिरण्यपर्णः हिरण्यं पर्णं रथो यस्य स हिरण्यपर्णः सूर्यः वैकर्णः विकर्णे कोटरे तिष्ठती
ति वैकर्णोऽग्निः ते दिक् वायु सूर्याग्नयः त्वां मनूमनसां करोतु मत्हृदयां कुर्वंतु अत्र कन्यका संकटनिवृत्तिः स्वहृदयैक्याशं
सा च वाक्यार्थः ततः कन्यावरयोरन्योन्यदर्शनमंत्रः अथैते समीक्षेते अघोरचक्षुरिति हे कन्यके अपतिघ्नी एधि भव
किंभूता त्वं अघोरचक्षुः अघोरं सौम्यं चक्षुः स्वपतिविषये यस्याः सा तथा किंच पशुभ्यः गवादिभ्यः शिवा कल्याणकरी
सुमनाः शोभनमनाः सुवर्चाः शोभनदीप्तिः वीरसूः वीरप्रसविनी देवकामा देवं देवनं क्रीडनं कामयते इति देवका
मा स्योना सुखिनी द्विपदे मनुष्याय चतुष्पदे पशुभ्यः शं कल्याणकरी नः अस्माकं भवेति सर्वत्र संबध्यते कन्यास्तुति ।
माह तेत्वां सोमः चंद्रः प्रथमः जन्मसमय एव विविदे लब्धवान् उत्तरः द्वितीयः गंधर्वः त्वां विविदे लब्धवान् तृ

तीयः तां अग्निः पतिः विविदे लब्धवान् तथा च प्रथमं सोमगंधर्ववह्निभिः स्त्रियो भुक्ता अतएव सोमः शौचं ददौ स्त्रीणां गंध-
र्वश्च शुभां गिरं पावकः सर्वमेध्यत्वं तेन अग्न्याहिता योषित इत्यभिप्रायः तथा च नेतव्या तुरीयः पतिः मनुष्यजः अहमित्य-
र्थः तत्किमेषामेव स्वत्वविषया स्यादित्याशंक्याह सो नः स इति तो विश्वसामा सूर्य इति। तस्य सूर्यस्य गंधर्वस्य मरीचयो
रश्मयः अप्सरसः आयुवयो नाम आयुवो नाम्नः आयोजयंति इत्यायुवः अन्यत्समानं सुषुम्नः सूर्यरश्मिश्चंद्रमा
इति। यश्चंद्रमा गंधर्वरूपः सुषुम्नः नामा रश्मिः अन्यत्समानम् सुषुम्नः सूर्यरश्मिश्चंद्रमा गंधर्वस्तस्येति तस्य चंद्र-
मसः नक्षत्राणि अप्सरसः किंभूतानि भेकुरयो नाम इषिरो विश्वेति। यो वातो गंधर्वः इषिरः गमनस्वभावः विश्वव्यचाः
सर्वगतः अपरं समानं इषिरो विश्वव्यचा वातो गंधर्व इति॥ यः वातः गंधर्वः तस्याप्सरसः आपः जलानि ऊर्जो नाम ऊ-
र्जो नाम्नः भुज्युः सुपर्ण इति। यो यज्ञो गंधर्वः किंभूतः भुज्युः भुनक्ति पालयति सर्वाणि भूतानि इति भुज्युः सुपर्णः
शोभनपर्णः शोभनगतिरिति यावत् अन्यत्समानं भुज्युः सुपर्णो यज्ञ इति॥ यः यज्ञो गंधर्वस्तस्याप्सरसः दक्षिणाः दक्षिणाः
किंभूताः स्तावा नाम दक्षिणायां दत्तायां यज्ञः स्तोतव्यो भवतीत्यभिप्रायः अपरं समानं प्रजापतिरिति। यन्मनो गंधर्वः

मं· धं· दी· ५८ प्रजापतिः प्रजानामीश्वरः विश्वकर्मा विश्वं कर्म यस्य तद्व्यापारेण विश्वस्य निर्माणात् प्रजापतिर्विश्वकर्मेति तस्य मन
सो गंधर्वस्याप्सरसः ऋक्सामानि ऋचः सामानि च एष्टयः अतिशयेच्छा नाम यास्ताः आ इष्टिः एष्टिः अतिशयेनेच्छा तथा
च पुत्रादीच्छायाः ऋगादिमंत्रप्रयुक्तास्ता याः पुत्रादिसंपद्यत इत्यभिप्रायः अभ्यातानसंज्ञकाः चित्तमित्यादित्रयोदशमंत्राः
यथा तत्र शेषपठित प्रजापतिर्जयानिंद्रायेत्यादिमंत्रे महद्ये प्रजापतिर्जयं ददातीति आशंसा भविष्यतीति सेवा तत्र मंत्रे
च चकारेण समुच्चिताः चित्तं ज्ञानेम त्वं जयं ददाति शेषः एवं सर्वत्र चित्तिः परिच्छेदः आकूतं चाभिप्रायं आकूति
श्च मनोधर्मविशेषो येन मनःप्रेरणं क्रियते विज्ञातं शिल्पादिज्ञानं विज्ञातिः विज्ञानार्थः मनश्च प्रसिद्धं शक्करी छंदः
पौर्णमासः प्रसिद्धः दर्शः अमावास्या प्रसिद्धा बृहच्च सामविशेषः रथंतरं च सामविशेषः प्रजापतिर्जयेति प्र
जापतिः इंद्राय जयान् प्रायच्छत् प्रदत्तवान् किंभूताय वृष्णे वृषनाम्ने प्रजापतिः किंभूतः पृतनाजयेषु उग्रः वि
पत्तेजोभिभावी कथं दत्तवान् इयतः कारणात् तस्मै प्रजाय तपे सर्वा विशः प्रजाः समनंत सम्यक् प्रमाणं कृत
वत्यः यतश्च प्रजापतिः उग्रो बभूव सर्वतेजोभिभावी बभूव हव्यद्रव्यवाही बभूव सहस्रो बभूव एतावद्गुणविशि
ष्टः प्रजापतिरत इंद्राय जयं दत्तवानिति प्रजापतिं स्तौति स प्रजापतिर्मह्यं जयं ददात्विति तात्पर्यं अग्निर्भूतानामधिपतिः ५८

दे × ३

ऽअष्टादश मंत्राः॥ अग्निर्भूतानामधिपतिः स मामावत्वस्मिन्ब्रह्मणि ब्राह्मण्ये अस्मिन्नक्षत्रे वीर्ये अस्यां आशिषि आशीरर्थे अस्यां पुरो
धायां अस्मिन्कर्मणि विवाहे अस्यां देवहूत्यां देवाह्वाने हतिराह्वाने तस्यां तस्मै स्वाहा सुहुतमस्तु॥ इन्द्रो ज्येष्ठानामिति। इन्द्रो ज्येष्ठानां
श्रेष्ठानां अधिपतिः अन्यत्समानं॥ यमः पृथिव्या इति॥ वायुरन्तरिक्षस्येति॥ सूर्यो दिव इति चन्द्रमा नक्षत्राणामिति बृहस्पतिर्ब्रह्म
ण इति। ब्रह्म वेदः मित्रः सत्यानामिति॥ वरुणोयामिति॥ समुद्रः स्रोत्यानामिति। स्रोत्यानां नदीनां॥ अन्नꣳ साम्राज्यानामित्या
दि। साम्राज्यानामैश्वर्याणां॥ सोम ओषधीनामित्या। सविता प्रसवानामित्यादि। रुद्रः पशूनामित्यादि॥ त्वष्टा रूपाणामित्यादि॥ वि
ष्णुः पर्वतानामधिपतिरिति॥ मरुतो गणानामधिपतय इति॥ पितरः पितामहा इति॥ पितरः पितामहाश्च परे प्रपितामहाः
अवरे पितामहात्पूर्वे ततो महान्तस्तस्मादपि पूर्वे ऽवरे पुरुषा उक्ताः बहुवचनं गौरवार्थं ते मां अस्मिंल्लोके अवन्तित्या
दि॥ अग्निरैतु प्रथम इत्यादि॥ अग्निः आसमन्तात् एतु आगच्छतु देवतानां इन्द्रादीनां प्रथमः मुख्यः आगतः सन् सोऽग्निः
अस्यै कस्या कन्यकायाः प्रजां पुत्रादिकं मृत्युपाशान्मृत्योः पाशात् बंधनात् मारणात् मुंचतु तदयं राजा वरुणः अ
नुमन्यतां स्वीकरोतु कथं मोचयतु यथा इयं स्त्री पौत्रं अघं पुत्रमभं दुःखं न रोदीत् तथा ते वरुणानुमतोऽग्निस्तथा
मोचयतु यथा इयं स्त्री पुत्रवियोगदुःखं नानुभवतीति वाक्यार्थः रोदीत् इति रुदिर अश्रुविमोचने इत्यस्य लेटि
रूपं॥ इमामग्निरिति॥ गार्हपत्योऽग्निः इमां त्रायतां रक्षतु यथा अस्यै कन्यकायै पुत्रादिकं नयतु प्रापयतु तथादी

र्घआयुः तथा सति इयं कन्या अभ्रून्योपस्था नित्यं भर्तृसुखसंयुक्ता भवतु तथा जीवतां मातास्तु जीवद्वत्सा भवत्विर्थः त
था पौत्रं पुत्रं भवमानंदसुखं अभिविबुध्यतां सर्वे नो भावेनानुभवतु ॥ स्वस्तिनो अग्ने दिवेति ॥ हे यजत्र यजंतं त्रायते इति यजत्रः नो
स्माकं स्वस्तिकल्याणानि धेहि धारय अयथा अयथाक्रमं एक दैवेत्यर्थः कल्याणानि किंभूतानि विश्वानि सकलानि दिवा
पृथिव्या दिवि पृथिव्यां च यानि कल्याणानि तानि सर्वाणीत्यर्थः किंच यदस्यां महिमत्स्यां दिवि स्वर्गे जातं तत्स्त्रं प्रशस्तं श्ला
घ्यं द्रविणं धनं तत् अस्मासु धेहि किंभूतं चित्रं नानाविधं गोहिरण्यादि ॥ सुगन्नं पंथामिति ॥ हे ज्योतिर्मध्ये सारभूत इति शे
षः अग्ने इति यावत् नो अस्माकं पंथां पंथानं प्रदिशन् राधि आगच्छ तथा मृत्युः अपैतु अपगच्छतु तथा अमृतं मोक्षः
स मे मम आगात् आगच्छतु तथा वैवस्वतो यमः नो स्माकं अभयं कृणोतु करोतु आशंसा वा कार्यार्थं ॥ परं मृत्यो अनुप
रेहीति ॥ हे मृत्यो परं पंथां उत्कृष्टं पंथानं अनुपरेहि अनुगच्छते तव य अन्यः अहिंसात्मकः हिंसातोन्यः लोको ऽ
हिंसात्मक इत्यर्थः तं पंथानं परेहि परावृत्य गच्छ पंथाः किंभूतः देवयानादितरः उत्कृष्टः अन्य देव वर्त्मन उत्कृष्टः
अन्येन केनापि देवेन नायमनुगतः पंथा इत्यर्थः किंच ते तव एतदेव ब्रवीमि किंभूताय चक्षुष्मते सकलव्यवहार
उद्दिशन् ४५

दृष्टवते श्रुतवते सकलव्यवहारं श्रुतवते किं ब्रवीमि नो ऽस्माकं प्रजां मा रीरिषः मा हिंसीः अपि च वीरान् पुत्रान् मा रीरि
षः ममानयाऽऽहुत्या तेषु स्वेच्छां कुर्वित्यर्थः रीरिष इति रिष हिंसायामित्यस्य धातोर्ण्यन्तस्य लङ् मध्यमपुरुषैक
वचने माङि रूपं माङ्योगाद् अडागमो न भवतीति वीरशब्देन पुत्रोऽभिधीयते इत्यत्र पुत्रो वै वीर इति श्रुतिः प्रमाणं ॥ मं॰ अ
र्यमणमिति ॥ इयं कन्या अर्यमणं देवं सूर्य्यं अयक्षत पूजयति किंभूतं देवं अग्निं अग्निस्वरूपं किमर्थं पूजयति स अ
र्यमा देवः इतः पतेः पत्युः सकाशात् मां मा नो अमुं च तु न प्र मोचयतु मम पतिवियोगः कदाचिदपि नो भवत्विति ता
त्पर्यार्थः ॥ मं॰ इयं नार्युपब्रूते इत्यादि ॥ इयं नारी उप ब्रूते वदति किं कुर्वती लाजान् आवपन्तिका आवपन्ती प्रक्षिपन्ती किं ब्रू
ते मम पतिः आयुष्मान् अस्तु दीर्घायुर्भवतु तथा च मम ज्ञातय एधन्तं वृद्धियुक्ता भवन्त्विति एधन्तमिति छान्दसं ॥
हस्वतं ॥ मं॰ इमान् लाजानित्यादि ॥ अहं इमान् लाजान् अग्नावावयामि प्रक्षिपामि किंभूतान् लाजान् तव पत्युः समृद्धिक
रणं समृद्धिकरान् समृध्यर्थमित्यर्थः अपि च मम तुभ्यं च तव च मम च संवदनं वशीकरणं तत् अग्निः अनुमन्य
तां इत्येतदर्थं तुभ्यमित्यत्र षष्ठ्यर्थे चतुर्थी सुपां सुलुगादिना विभक्तिलोपः ॥ मं॰ गृभ्णामि त इति ॥ ते तव हस्तं गृभ्णामि गृ ।

वा॰

म॰पं॰ टी॰ ६० ह्णामि किमर्थं सौभगत्वाय सौभाग्याय तथा च मया पत्या सह जरदष्टिः आसः वृद्धा भवसीत्यर्थः जरद् वार्धकं।
अश्नुते व्याप्नोति इति जरदष्टिः हस्तग्रहणे किमर्थं तवाधिकार इत्येतद्व्याख्यामाह॥ भगइत्यादि॥ त्वा त्वां देवा[illegible] मह्यं प्र
दुः दत्तवंतः के ते देवाः भगः सविता अर्यमा च किंभूतां त्वा पुरंध्रिः पुरंध्री गार्हस्थ्याधिकारिणीं किमर्थं मदुः गार्ह।
पत्याय गृहपतित्वाय किंभूतो हं अमोस्मि न वर्जते मा लक्ष्मीरस्येति अमः तादृशो हं त्वं च सा लक्ष्मीः तथा च त्वया ल।
क्ष्म्या विना शून्यो हं त्वं मम लक्ष्मीर्भवेति भावः॥ सा त्वमस्यमो हमिति॥ पुनरभिधानं आदरातिशयार्थं तथा हं साम
अस्मि सामवेदोस्मि ऋक् त्वं ऋग्वेदस्त्वं अहं द्यौः स्वर्गः त्वं पृथिवी तथा च उभावपि योग्यावित्यभिप्रायः ततश्च त्वं
मे एहि अभिमुखी भव नौ आवां विवाहावहै विवाहं करवाव तथा सति रेतः शुक्रं सह दधावहै धारयावः प्रजां संत
तिं प्रजनयावहै उत्पादयावः बहून् पुत्रान् विंदावहै प्राप्नुवः ते च पुत्रा जरदष्टयः संतु दीर्घायुषो भवंतु किंच आ
वां शरदः शतं पश्येम जीवेम शरदः शतं शृणुयाम आवां किंभूतौ संप्रियौ अन्योन्यानुरक्तौ रोचिष्णू दीप्तियुक्तौ अ
त्र हग्रहोर्भः छंदसीति हकारस्य भकारः॥ आरोहेममश्मानमिति॥ हे कन्यके त्वं इमं अश्मानं आरोह आक्रम।

वा =

किमर्थं अनेनाश्मारोहणेन त्वं स्थिरा भव कइव अश्मेव किंच पृतन्यतः त्वत्प्रतिपक्षान् तथाऽऽत्मानः पृतनां सेनां ॥
गच्छतः पुरुषान् अभितिष्ठ आक्रम पृतनाया आयतः आगच्छतः तादृशानेव अवबाधस्व खंडय "पृतनायत
इति" लोहितादिगणे पठितः "पृतन्यत इति च सरस्वति प्रेदमिति" हे सरस्वति यां त्वां प्रगायामि उत्कीर्तयामि सा त्वं
इदं विवाहकर्म प्राव प्रकर्षेण पालय सरस्वति किंभूते वाजिनीवति वाजिनी घोटिका तत्सदृशे घोटिका यथा शी
घ्रं गच्छति तथा त्वमपि कीर्त्तिरूपा शीघ्रं गच्छसीत्यर्थः कुत्र गच्छसीत्याकांक्षायामाह अस्य विश्वस्य सर्वभूतस्य
प्राणिजातस्याग्रतः कीदृशी सा यस्यां सरस्वत्यां भूतं पृथिव्यप्तेजोवाय्वात्मकं समभवत् सम्यक् बभूव तथा यस्यां
इदं विश्वं जगत् तां गाथां गाथापालिकां सरस्वतीं इदानीं गास्यामि कीदृशीं गाथां या गाथा स्त्रीणां उत्तमम् उत्कृष्टं य
शः एवं सरस्वतीं स्तुत्वा सा मम एतद्विवाहकर्मन्न ममप्रमादकृताशुद्धमंत्रपाठः अन्यवैगुण्यमित्रसनेन परिपाल
यत्विति वाक्यार्थः "प्रगायामीति" गै शब्दे णिच् गास्यामीति वर्त्तमाने लृट् "तुभ्यमग्ने इति" हे अग्ने प्रथमं अग्रे एनां
कन्यां सूर्यां सूर्यवत्कांतिशालिनीं तुभ्यं त्वं पर्यवहन् विवाहितवान् इत्यर्थः एतां त्वया सह पुनर्मनुष्येभ्यो वहतु वि

मं·धं·
दी·
६१

वाहयत ततश्च पतिभ्यः मनुष्यपतये एनां जायां प्रजया संतत्या सह ददाः देहीत्ययं वाक्यार्थः हे अग्ने असौ प्रथमं
तया विवाहिता तवैव जाया इदानीं संतत्या सह एनां जायां मनुष्याय पत्ये देहीनि मह्यमिति यावत् दा इति लोट्सि प्र
त्ययः॥ अथ सप्तपदी मंत्र व्याख्या॥ मं एकमिषे विष्णुरिति॥ हे सखे पत्नि त्वां त्वां एकं पदं विष्णुर्नयतु किमर्थं मिषे ईप्सितायज
गमनाय विष्णुस्त्वामेकं पदं अभीष्टलाभार्थं नयतित्याशंसा वाक्यार्थः द्वे पदे विष्णुः त्वां नयतु किमर्थं ऊर्जे बलाय
त्रीणि पदानि विष्णुः त्वां नयतु किमर्थं रायस्पोषाय रायो धनं तस्य पोषः पुष्टिस्तदर्थं चत्वारि पदानि विष्णुर्नय
तु किमर्थं मायोभवाय मायः सौख्यं तस्य भव उत्पत्तिस्तदर्थं पंचपदानि त्वां विष्णुर्नयतु किमर्थं पशुभ्यो गवा
दिभ्यः षट् पदानि विष्णुर्नयतु किमर्थं ऋतुभ्यः ऋतुसमय प्राप्तये विष्णुः सप्तपदानि नयतु सा त्वं सप्तपदी भव
भूरादि सप्तलोकस्था भव तथा मामनुव्रता भव मम व्रतं संकल्पं अनुपालयंती भव अत्र सर्वत्र मंत्रे सखे त्वा
मिति च योज्यं भूरादि सप्तलोक प्राप्तये पतिव्रतात्वाय च सप्तमं पदं विष्णुः त्वां नयतित्याशंसा वाक्यार्थः॥ मं आपः शि
वाः शिवतमा इति॥ या आपः शिवाः कल्याण्यः शिवतमाः अतिशयेन कल्याण्यः शांता अनुपद्रवकारिण्यः शांतत

६१

मा: अतिशयेन शांता: तास्त्वापस्ते तव भेषजं रोगनाशं कृण्वंतु कुर्वंतु कृण्वंतु इति कृञ् हिंसाकरणयोऽस्त्व त्यस्मा ज्ञातो
आपोहिष्ठेत्यादि व्याख्याता॥ मम व्रते ते हृदयमिति॥ हे कन्यके ते तव हृदयं मम व्रते निश्चये दधामि अर्पयामि मद्व्रतं कारयामीत्य
र्थ: तथा सति॥ तव चित्तं हृदयं मम चित्तं अनु अस्तु॥ मम चित्तानुकूलं भवतु तथा मम वाचं वाक्यं एकमना: सती जुषस्व से
न स्व मदीय वचनकारिणी भवेत्यर्थ: तथा प्रजापति: ब्रह्मा त्वा त्वां मह्यं नियुनक्तु नियोजयतु॥ सुमंगलीरियमिति॥ हे सरव्य:
इयं वधू सुमंगली शोभनमंगलयुक्ता इयमभूत् तामिमां समेत संगच्छत तथा इमां पश्यत अवलोकयत अस्यै सौभा
ग्यं दत्वाय अथानंतरं अस्तं स्वस्थानं विपरेतन गच्छत इमां सम्यक् दृष्ट्वा अस्यै सौभाग्यं च दत्वा स्वस्थानं गच्छतेति
वाक्यार्थ: अत्र दत्वायेति क्त्वास्थाने यक् विपरेतनेति इण् गतौ विपरा पूर्व: मध्यमपुरुषैकवचने तमप्॥ इह गाव इति॥
इह चर्म्मणि तया उपविशंत्या सह गाव: निषीदंतु उपविशंतु इह अश्वा: पुरुषा: परिजनमनुष्या: उपविशंतु उ शब्दोऽप्य
र्थे इह सहस्रदक्षिण: बहुदक्षिण: यज्ञोऽपि निषीदतु तथा पूषा पुष्टिकारी आदित्य: निषीदतु तथा ते: सह वलीवर्द्द चर्म्म
णि उपविश एतत्सहवासेन तव कल्याणमस्त्विति वाक्यार्थ:॥ ध्रुवमसीति॥ हे ध्रुव त्वं ध्रुवमसि अनाशी तिष्ठसि त्वा त्वां
ध्रुवं पश्यामि किमर्थं त्वमपि ध्रुवा शाश्वती सती पोष्या पोषणीया एधि भव इत्येतदर्थं किंच बृहस्पतिस्त्वा त्वा मह्यं

मं॰ पं॰ टी॰ ६२

अदात् दत्तवान् तथा सति त्वं प्रजावती पुत्रादिसहिता मया पत्या सह शरदः शतं शतवर्षाणि जीवतं मयि शाश्वती भ
वेत्येतदर्थं पश्यामीत्यंतर्भाविणिच ध्रुवामिति स्त्रीलिंगे प्राप्ते नपुंसकलिंगत्वं छांदसं इति विवाहमंत्राः अथ चतुर्थी
मंत्राः व्याख्यायते "अग्ने प्रायश्चित्ते इति" हे अग्ने प्रायश्चित्ते सकलदोषापसरणस्वरूप त्वं देवानामिंद्रादीनां प्राय
श्चित्तिः असि दोषापहर्त्ता भवसि अतः कारणात् ब्राह्मणोऽहं त्वां ताउपधावामि उपसर्पामि अहं किंभूतः नाथकामः
या त्वाकामः यात्वार्थमुपसर्पामीत्यर्थः काया त्वा अस्यै अस्याः कन्यकायाः या तनूः पतिघ्नी यदंगं पतिहिंसकं अ
स्याः तां ते नाशय अपाकुरु तदंग लक्षणं मया कुर्वित्यर्थः हे अग्ने यतस्त्वं देवानामपि दोषापहर्ता अतोऽपमुपसर्पितः स
न् अस्या तदंगलक्षणं नाशयेति वाक्यार्थः अस्यै इति षष्ठ्यर्थे चतुर्थी "वायो प्रायश्चित्ते इति" हे वायो अस्याः या प्रजाघ्नी सं
तानविरोधिनी तनूः अन्यत्समानं "सूर्य प्रायश्चित्ते इति" हे सूर्य अस्याः पापघ्नी गवादिनाशिनी तनूः अन्यत्स
मानं "चंद्र प्रायश्चित्ते इति" हे चन्द्र अस्या गृहघ्नी गार्हस्थ्यविरोधिनी तनूः अन्यत्समानं "गंधर्व प्रायश्चित्ते इति" हे गंधर्व गोः
हिरण्यस्य धारक प्रकाशकारक या अस्या पशोघ्नी पशोनाशिनी तनूरन्यत्समानं "या ते पतिघ्नीति" हे कन्यके असौ या
तव निंदिता दोषावहा तनूः तामेनां तनूं जारघ्नीं जार उपपतिः तन्नाशिनीं करोमि सा का निंदिता तनूः या पतिघ्नी प्रजाघ्नी प

हे सूर्य अस्याः पापघ्नी गवादिनाशिनी तनूः = ४

अघ्नी गृहघ्नी यशोघ्नी एतच्च व्याकृतमेव अनेन वाभिषेककर्मणा सा त्वं मया सह जीर्य जरां प्राप्नुहि दीर्घायुर्भवेत्यर्थः प्रा
णैस्ते प्राणानिति हे कन्यके तव प्राणान् प्राणैः अर्थात् मदीयैः संदधामि संयोजयामि अस्थिभिस्ते अस्थीनि संदधामि मांसैस्ते
मांसानि संदधामि त्वचा ते त्वचं संदधामि अनेन स्थालीपाकप्राशनेन कर्मणा मया सह तव एकप्राणत्वैकास्थित्वैकमांसत्वै
कचर्मत्वानि करोमीति वाक्यार्थः इति चतुर्थी मंत्रव्याख्या समाप्ता अथ शिष्टनिःक्रमणं तच्चक्षुरित्यादि व्याख्यातं अथान्न
प्राशने देवीं वाचमिति देवा ब्रह्मादयः वाचं वाणीं अजनयंत उत्पादितवंतः वाणीं किंभूतां देवीं कान्त्यादिगुणवतीं तां वाचं
विश्वरूपाः मनुष्यादिरूपाः पशवः वदंति देवापेक्षया स्वल्पज्ञानत्वेन पशुत्वं सा वाक् धेनुर्भूत्वा अस्मान् ये तु उपगच्छ
तु उप इति व्यवहितं एतु इत्यनेन संबध्यते हेतुगर्भितविशेषणमाह धेनुः किंभूता नः अस्माकं ऊर्जं सामर्थ्यं दुहाना पू
रयंती ऊर्जं किंभूतं मंद्रं मंद्रो गंभीरः अव्यक्त इति यावत् तस्य इष्टं गमकं ज्ञापकमित्यर्थः अव्यक्तः परोक्षोऽप्यर्थो ये
नावगम्यते तत्सामर्थ्यमस्माकं पूरयंतीत्यर्थः पुनः किंभूता सुष्टुता सुष्टु स्तुता वाजो नो अद्येति वाजो अन्नं नोऽस्मा
कं अथान्नप्राशनसमये दानं होमरूपं प्रसुवाति अभ्यनुज्ञानात् प्र पूर्वः सुवतिरभ्यनुज्ञाने वर्तते इत्युवटः किंच
वाजः देवानिंद्रादीन् ऋतुभिः समयविशेषैः कल्पयाति योजयतु अस्मिन् कर्मणि हुतेनान्नेन देवाश्चिरकालं वर्त्त

मं॰ब्रा॰ तामित्यर्थः ह्रियते वाजः मामां सर्ववीरं सर्वत्रकार्येषुवीरं त्वमेवं चकार कृतवान् अतः कारणात् वाजयति रन्नस्येश्वरो हे सर्वा
दी॰ आशीः जपेयं प्रसुवातिकल्पयाति इतिपदद्वयं लेट्प्रत्यये रूपं प्राणेनान्नमशीयस्वाहा प्राणेन प्राणवायुनाऽन्नमदीयं अ
६३ शीय भुंजे अपानेन गंधानशीयस्वाहा अपानेन अपानवायुना गंधान् अशीय चक्षुषारूपाण्यशीयस्वाहा चक्षुषा चक्षुरिं
द्रियेण रूपाणि शुक्लादीन् अशीय श्रोत्रेणयशोशीयस्वाहा श्रोत्रेण कर्णेन्द्रियेण यशः कीर्त्तिं अशीय अत्र गंधरूपय
शसांअशनमुपभोगमनुभवामीत्याशंसा वाक्यार्थः अत्र चाशीयेत्युत्तमपुरुषयोगात्कर्तृगोचराशंसा यद्यपि प्रतीय
ते तथापि कुमारगोचरैव बोद्धव्या तथा च श्रुतिः यांवैकांचित् यज्ञेऋत्विज आशिषमाशासते यजमानस्यैवेति इत्य
न्नप्राशनमंत्रव्याख्यासमाप्ता ॥ अथ चूडाकरणमंत्रव्याख्या ॥ मं॰ उष्णेन वाय उदकेनेति ॥ हे वायो वायुसंबोधनेनात्र कार्ये
कारणोपचारात् जलमेव संबोधितं हे जल किंभूतः अदिते अखंडितशीतत्व उष्णेन उदकेन एसि संगतं कुरु संगत्या च
केशान् वय छिधि केशछेदनार्थं उष्णजलशीतजलयोः संगतिरस्त्विति वाक्यार्थः अदित इति दोऽवखंडने इत्यस्य
धातोः क्तिन् ॥ सवित्रा प्रसूता इति ॥ आपः जलानि ते तव कुमारस्य तनूः देहावयवं उंदंतु क्लेदयंतु उंदी क्लेदने आपः किंभू

छिधि केशछेदनार्थं उष्ण जल = २

ताः सवित्राप्रसूताः जनिताः पुनः किंभूताः देव्याः दिव्याकाशेउत्पन्नाः किमर्थं मंदंतु दीर्घायुस्त्वाय चिरंजीविताय वर्चसे
तेजसे ॥ औषधे त्रायस्वेति ॥ हे औषधे एनं कुमारं त्रायस्व रक्षस्व हे स्वधिते वज्र एनं कुमारं माहिंसीः मानाशय तथाच कु
शेः कृतरक्षमेनं कुमारं वज्रमाहिनस्तु इति वाक्यार्थः ॥ शिवो नामासीति ॥ हे क्षुर शिवो नामासि शिवं कल्याणं इत्यभिधानो
सि शिव इति तव नामेत्यर्थः किंच स्वधितिर्वज्रं ते तव पिता वज्रान्तवोत्पत्तिरित्यर्थः एवंभूताय ते तुभ्यं नमोस्तु त्वं मामांमा
हिंसीः माव्यथयस्तुतिपूर्वकं याञ्चावाक्यार्थः अत्रापि पूर्ववत् कुमारविषयिण्येवाशंसा बोद्धव्या ॥ निवर्त्तयाम्यायुष इति ॥ पु॰
अहं क्षुरं निवर्त्तयामि संयोजयामि निपूर्वो वर्त्तिः संयोगे संलापने वर्त्तते इति कर्कभाष्यं क्षुरस्य कर्मत्वं प्रकरणात् किमर्थं
क्षुरसंयोजनमित्याह आयुषे जीवनाय तथान्नाद्याय अन्नं च तद्वै दो अद्यं चेति तदर्थं यद्वा अन्नं च तदाद्यं चेत्यन्नाद्यं तस्मै
रायस्पोषाय रायस्य धनस्य पोषाय पुष्ट्यर्थं तथा सुप्रजास्त्वाय शोभनसंतत्यर्थमित्यर्थः तथा सुवीर्याय उत्कृष्टवी
र्यार्थं अनेन क्षुरकर्मणा कुमारस्यान्नादीनि भवंत्विति आशंसा वाक्यार्थः सुप्रजास्त्वायेति सकारः छांदसः वर्णागमो व
र्णविपर्ययश्चेति न्यायेन ॥ येनावपत्सवितेति ॥ हे कुमार तेन क्षुरेण तेतव ब्रह्मणः ब्रह्मा तथा वपति मुंडयति तेन केन क्षु

मं॰ धी॰ दी॰ ६४

रेणयेनसविताऽऽदित्यः सोमस्यअवपत् मुंडितवान् अर्थात् केशान् किंभूतस्यसोमस्यराज्ञः नकेवलंसोमस्य किंतु
वरुणस्यचकिंभूतआदित्यः विद्वान्वेदवित् तथाकथं यथा इदंचूडाकरणंतवआयुष्यंशतंभूयात् किंभूतमायुष्यंज
रदष्टिः जरदंवार्धकंअश्नुते व्याप्नोतीतिजरदष्टिः वार्द्धकपर्यंतंतवायुर्यथास्यादित्यर्थः आदित्येनसोमवरुण
योर्येनचूडाकर्मकृतंतेनतवब्रह्माकरोतीतिस्तुता तन्नेआयुष्यंभूयादित्याशंसावाक्यार्थः ब्रह्मणइतिप्रथमैकवच
नेषष्ठ्येकवचनं जरदष्टिरिति अजहल्लिंगमेव त्र्यायुषंजमदग्नेः इति त्रीणिआयूंषिसमाहृतानित्र्यायुषं आयुः
शब्दश्चावस्थावचनः बाल्ययौवनवार्धका[illegible]कमवस्थात्रयंत्र्यायुषमित्यर्थः तथाचकश्यपस्यऋषे यत्र्यायु
षंयमदग्नेः यत्र्यायुषंदेवानां यत्र्यायुषं तत्र्यायुषंनः अस्माकमस्तु येनभूरिश्चंद्रमादिवमिति येनक्षुरेणसा
धनभूतेनभूरिश्चंद्रमादिवंज्योक्स्वर्गंसंगतोऽभवत् चंद्रमाकिंभूतः चराचरभ्रमणशीलः पश्चात्सएवचंद्रमाः
अधिसूर्यंसूर्येज्योक्संगतोऽभवत् तेनक्षुरेणतेतववपामि त्वांक्षौरयामि कस्मैफलायेत्याकांक्षायामाह ब्रह्म
णब्रह्मणेवेदलाभार्थंजीवातवेजीवनौषधार्थंजीवनोपायप्राप्त्यर्थमित्यर्थः जीवनायचिरकालजीवनार्थंस।
श्लोकायसुशोभनंश्लोकाययशः यत्तदीयलाभार्थं [illegible] यत्क्षुरेणमज्जयतेति। यत्क्षुरेणरातस्यकु। ६४

मारस्य वप्ता वावयति क्षौरं समाप्य पुनः क्षौरं करोषि तेन अस्तु तस्तये कल्याणार्थं स्य केशान् छिंधि आयुः मा प्रमोषीः आ
युः खंडनं माकुरु क्षुरेण किंभूतेन शिरः मज्जय तानिः कलुषं कुर्वता पुनः किंभूतेन सुपेशसा शोभना युधेन वय
तीति मध्यमपुरुषैकवचने तिङां तिङो भवंतीति प्रथमपुरुषैकवचनं "प्रमोषीरिति" मुष स्तेये मज्जयतेति उमसृजो छे
वप्तावेतिवा शब्दः समुच्चयार्थः इति चूडाकरण मंत्र व्याख्या अथोपवीत मंत्र व्याख्या यते "येनेंद्रायेति बृहस्पतिर्दे
वा नामाचार्य्यः येन विधानेन इंद्राय इदं वासः पर्य्यदधात् परिधापितवान् वासः किंभूतं अमृतं अहतं तेन विधानेन त्वा
त्वां परिदधामि परिधापयामि किमर्थं मायुषे जीवनाय दीर्घायुस्त्वाय चिरं जीविताय बलाय च सामर्थ्याय वर्चसे तेज
से पर्यदधात् परिदधामीति द्वयमपि णिजर्थे "इयं दुरुक्तमिति" इयं मेखला आगात् आगतवती किं कुर्वाणा मे मम
दुरुक्तं अप्राप्य य मनु वीतीति दुर्वचनं परिवाधमाना सर्वतोभावेन खंडयंती पुनः किंभूता वर्णं द्विजाति पवित्रं उ
त्कृष्टं पुनतीति पावयंती ईदृशा यं मेखला स्वसा अस्तु भागिनी वनित्य मभ्युदयार्थिनी अस्तु किंभूता प्राणापानाभ्यां
बलमाचधाना प्राणापानयोः सामर्थ्यमर्पयंती पुनः किंभूता सुभगा अकर्कशा सुखस्पर्शेति यावत् "यज्ञो
पवीतमिति" हे माणवक यज्ञोपवीतं प्रति मुंचधारय प्रतिमुंचेति धारणे प्रवर्त्तते यज्ञोपवीतं किंभूतं आ

मं॰ १ थे॰ दी॰ ६५ युष्यं आयुर्वृद्धिकरं अग्र्यं श्रेष्ठं शुभ्रं श्वेतं निर्मलं परमं अतिशयेन पवित्रं पुनः किंभूतं यत्पुरस्तात् पूर्वं प्रजापतेः।
ब्रह्मणः सहजं सहजातं प्रजापतिना सह एकसमये जातमित्यर्थः एतत्परिधानेन बलमस्तु तेजश्चास्त्विति ॥ मं॰ यो
मे दंडः परेति ॥ मम यो दंडः अधिभूम्यां भूमेरुपरि पराऽपतत् पतितं तं दंडं अहं पुनः आददे गृह्णामि किंभूतो दंडः वै
हायसः विहायः आकाशं तत्र भवः एतावता प्राक्तनजन्मन्यपि अहं द्विज आसं अस्मिन्नपि जन्मनि दंडं गृह्णामीति
वाक्यार्थः किमर्थं दंडं गृह्णामि आयुषे जीवनाय ब्रह्मणे वेदाय ब्रह्मवर्चसाय तेजः प्राप्त्यर्थं तच्चक्षुरिति व्याख्यातं संध्या
यां मम व्रते ते हृदयमिति विवाहे व्याख्यातं ॥ मं॰ इन्द्रस्येति ॥ इन्द्रस्य परमेश्वरस्य ब्रह्मचारी असि त्वं अग्निराचार्यः सर्वेषा
मेव द्विजातीनां सामान्येनाग्नेर्गुरुत्वात् यथाह गुरुरग्निर्द्विजातीनामिति श्रुतिः इदानीं तु तवोपनयनकर्तृत्वेनाहमा
चार्यः ॥ मं॰ प्रजापतये त्वा परिददामीत्यादि ॥ हे माणवक त्वां प्रजापतये ब्रह्मणे परिददामि समर्पयामि ॥ मं॰ देवाय त्वा सवि
त्रे इत्यादि ॥ एवं सवित्रे सूर्याय देवाय दानादिगुणयुक्ताय अद्भ्यः जलेभ्यः ओषधीभ्यो व्रीह्यादिभ्यः द्यावापृथिवी
भ्यां आकाशभूमिभ्यां विश्वेभ्यो देवेभ्यः सर्वेभ्यः इन्द्रादिभ्यः सर्वेभ्यो भूतेभ्यो राक्षसादिभ्यः परिददामीति सर्वत्रा
न्वेति किमर्थमरिष्ट्यै रिष्टिरापत् तदुपशमाय ॥ रिष्टिरिति रिषि हिंसायामित्यस्य धातोः क्तिन् रूपं न रिष्टिः ६५

अरिषि॥ अग्ने सुश्रव इति॥ हे अग्ने सुश्रवः नामकीर्त्तिः यस्यासौ सुश्रवाः तादृशो मा मां सुश्रवसं शोभनकर्णेन्द्रियं।
कुरु वेदाध्ययनार्थं मामविकलेन्द्रियं कुर्वित्यर्थः॥ यथा त्वमित्यादि॥ एवं हे अग्ने यथा त्वं सुश्रवा असि सुश्रवाः अद्वरादे
श्रुश्रवाः शोभनकर्णोसि॥ एवं मामिति॥ एवं तथा मां सुश्रवः सौश्रवसं सुश्रवे यशसि सौश्रवसं शोभनश्रवण।
जनित ज्ञानशालिनं कुरु॥ यथा त्वमिति॥ तथा हे अग्ने त्वं यथा देवानां यज्ञस्य निधिपा असि देवानामिन्द्रादीनां यज्ञ
स्य यज्ञस्य संबंधेन निधिपा निधिरक्षकोसि भांडागारिको भवसि॥ एवमिति॥ एवमहं वेदस्य निधिपो भूयासं वेद
स्य भांडागारिको भवामीत्यर्थः॥ अग्नये समिधमिति॥ हे अग्ने समिधमाहार्षं आहृतवानस्मि कस्मै जातवेदसे।
अग्नये तुभ्यमेवेत्यर्थः किंभूताय बृहते ज्वलमानाय हे अग्ने यथा त्वं समिधा समिध्यसे मदाहृतया अनया समिधा ज्वल।
सि एवं अहं समिंधे सप्रकाशो भवामि केः आयुषा जीवने मेधया बुध्या वर्चसा तेजसा प्रजया संतत्या पशुभिर्गवादि
भिः ब्रह्मवर्चसेन ब्रह्मतेजसा किंच ममाचार्यो जीवपुत्रो मेधावी च भवत्विति शेषः अहं अनिराकरिष्णुः असानि भ
वानि अग्निमाधाय यागस्यानिराकरणकारी अनिराकारिष्णुः नित्यं यागकारी भवामीत्यर्थः किंच अहं आयुष्मान्यशा

मं·ब्रा·दी· ९९

स्वी तेजस्वी ब्रह्मवर्चस्वी वेदाध्ययनसमृद्धिमान् अन्नादः भूयासं कदाचिदपि मम मान्नविच्छेदो मा भवतीत्यर्थः अनयाकामन
याऽग्नयेस्वाहा सुकृतमस्तु॥ मं॥ तनूपा अग्नेसि तन्वं मे पाहि॥ हे अग्ने तनूपा असि तनूः शरीरं तस्य पालयिता असि अतः मे तनूं शरी
रं पाहि रक्ष॥ मं॥ आयुर्दा अग्नेऽस्यायुर्मे देहि हे अग्ने आयुर्दा असि आयुः प्रदोसि अतः आयुः मे देहि॥ मं॥ एवं वर्चोदा अग्नेसि वर्चो
मे देहि वर्चस्तेजः॥ मं॥ अग्ने यन्मे तन्वा ऊनं तन्म आपृण॥ हे अग्ने तन्वा शरीरस्य मे यत् ऊनं न्यूनं तन्मे आपृण पूरय॥ मं॥ तन्व मिति
तनूशब्दस्य द्वितीयैकवचने इयङ् उवङ् प्रकरणे तन्वादीनामुपसंख्यानमिति यणादेशः॥ मं॥ मेधां मे देवः सविता आद
धातु मे॥ मेधां मे देवी सरस्वती आदधातु॥ मेधां मे अश्विनौ देवावाधत्तां पुष्करस्रजौ॥ मं॥ अश्विनीकुमारौ देवौ मे मम मेधां आ
धत्तां कथंभूतौ पुष्करस्रजौ पुष्करं कमलं तन्मयी माला ययोः सर्वा प्रार्थना अग्नावेव वोद्धव्याः अंगानि च मे आप्या
यतां मे मम अंगानि च शरीरावयवाः आप्यायेतां स्फीता भवंतु न केवलं मेधादिकं किंतु एतदपि भवतीति वाक्यार्थः।
वाक् च म आप्यायतामित्यादि निगदव्याख्याने इत्युपनयनमंत्राः व्याख्याताः अथ समावर्त्तनमंत्रव्याख्या
मं॥ येप्स्वंतरग्नय इति॥ अप्सु जलेषु अंतर् मध्ये ये अग्नयः प्रविष्टाः तान् हं विजहामि त्यजामि केते गोह्यः उप।

९९

अ ः मयूष: मनोहा अस्वल: विरूज: तनूदुष: इंद्रियहा इत्यष्टौ अग्निनामानि एते चाग्नय: स्वनाम त एव दोषावह
उ अप्रतीयंते अत एव तान्विहाय इहजले योग्नि: रोचनस्तन्नामा कल्याण नामा तं गृह्णामि स्नानार्थं जले गोह्यादीन् अभी
उ षावहान् तस्मात् कल्याणप्रकाशकाग्नि: रोचननामा कल्याणप्रकाशकाग्निसहितं जलं गृह्णामीति वाक्यार्थ: तेनेमम
उ षिंचामीति तेन जलेन इमं आत्मानं अभिषिंचामि किमर्थं श्रियै लक्ष्मीलाभाय यशसे यशोलाभाय ब्रह्मणे ब्रह्मज्ञा
स लाभाय ब्रह्मवर्चसाय ब्रह्मतेजोलाभाय॥ येनश्रिय मकृणुतामिति तेन इति पूर्वमंत्रस्थं पदमनुवर्त्यते तेन केन
हे अश्विनौ भवंतौ येन जलेन श्रियमकृणुतां लक्ष्मीं कृतवंतौ तथा येन सुरां सुराजात दोषं अवमृशतां मार्जितवंतौ त
था येन अक्षौ अभ्यषिंचतां अक्षिणी अभिषिक्तवंतौ तथा वां युवयो: यज्जलं यश: यशोहेतु: तत् यशोहेतु: ममा
प्यस्तु इत्यध्याहार्य्यं उदुत्तममिति स्नानप्रकरणे व्याख्याते॥ उद्यन्भ्राजिष्णुरिति॥ इंद्र आदित्य: उद्यन् उदयं कु
र्वन् अस्थात् स्थितोऽभवत् किंभूत: भ्राजिष्णु: प्रकाशनशील मरुद्भि: देवै: यावभि: यावद्भि: यावंतो देवास्ते:
सह स्थितोऽभवदित्यर्थ: तत: हे आविदन् सर्वं जानन् आदित्य त्वं दशसनिरसि वहुधनोसि अतो मामोदशसनिं वहु।

मं॰ पं॰ टी॰ ६७

धनं कुरु किंच मा मां ब्रह्मचर्यादुत्तीर्णं आगमय जानीहि द्वितीय तृतीययोः दिवा यावभिः सायं यावभिरिति शतस
निः सहस्रशनिरित्येतावन्मात्रविशेषः तत्र दिवासायमिति च प्रसिद्धार्थे शतसहस्रशब्दौ बहुत्ववाचिनावेव अ
न्यत्सर्वं समानं एवमादित्यं स्तुत्वा हे आदित्य मां बहु धनं कुरु ब्रह्मचर्यादुत्तीर्णं च जानीहीति याज्ञवाक्यार्थः या
वभिरित्यत्र वर्णलोपः छांदसः आगमय इति कुर्वाविदन्नित्यत्र स्थितेनाव्यवहितेन तत्र संबंधः॥ अन्नाद्यायेति॥ हे वन पं॰
स्पते त्वं रहध्वं बृहस्व प्रसिद्धो भव यं वनस्पतिं त्वा सोमः चंद्रमाः आगमत् आगतवान् कथंभूतः सोमः राजा वनस्पतीनां
धो॰ च यशो भगश्च मां आविदत् प्राप्नोतु किंच भगः सौभाग्यं यशश्च मां प्रतिपद्य तां आगच्छतु पुनः पुनरभिधानमाद
ध॰ तिशयेन अनेन वस्त्राच्छादनेन एतानि मम संत्विति वाक्यार्थः॥ यामाहरज्जमदग्निरिति॥ याः पुष्पस्रजः यमदग्निः ऋ
: षिः आहरत् आहृतवान् किमर्थं श्रद्धायै श्रद्धार्थं एवमेवेति निश्चयः श्रद्धा कामाय अभिलषितसिद्ध्यर्थं इंद्रिया
= यचक्षुरादिप्राप्त्यर्थं ताः पुष्पस्रजः अहं प्रतिगृह्णामि किमर्थं यशसा यशसे भगेन च भगाय तथा चानेन पुष्प
ग्रहणेन एतत्सर्वं मम भवत्विति वाक्यार्थः॥ यद्यशोऽप्सरसामिति॥ इंद्र अप्सरसां उर्वशीप्रभृतीनां यत् यशः च

रिष्टनेमिः अनपहितास्त्रः बृहस्पतिश्च नः स्वस्ति दधातु ॥ पृषदश्वा मरुतः पृश्निमातरः शुभंयावानो विदथेषु जग्मयः अग्निजिह्वा मनवः
सूरचक्षसो विश्वे देवा अवसागमन्निह ॥ इत्थंभूता मरुतः अवसा अन्नेन हविर्लक्षणेनाहूताः सन्तः इह नः अस्मान् आगमन् आगच्छन्तु किं
भूता मरुतः पृषदश्वा पृषतो हरिता अश्वा येषां ते पुनः किंभूताः शुभंयावानः शुभं कर्तुं जनान् ये यान्ति ते शुभंयावानः पुनः किंभूता
विदथेषु यज्ञेषु जग्मयः गमनशीलाः येऽग्निजिह्वाः हुतभोक्तारः चतुर्दश मनवः ते च इह आगमन् ये च सूरचक्षुषः आदित्यदर्शनाः
विश्वेदेवाः ते च इह आगमन् भद्रं कर्णेभिः शृणुयाम देवा ॥ भद्रं पश्येमाक्षभिर्यजत्राः स्थिरै रंगैस्तुष्टुवांसस्तनूभिर्व्यसनेमहि देव
हितं यदायुः हे देवाः कर्णेभिः कर्णाभ्यां भद्रमनुकूलं शृणुयाम अक्षिभिः अक्षिभ्यां भद्रं पश्येम देवाः किंभूताः यजत्राः यजनीयाः य
स्तुवंतः जतं त्रायंत इति वा किंच स्थिरैरंगैः दृढैः शरीरावयवैः तुष्टुवांसः देवहितं यदायुः तत् व्यसेमहि व्याप्नुवीमहि तनूभिः भार्यापुत्रपौत्रत
अर्थाद्भ नूभिः ... सह देवेन हितं आदित्य स्थापितं शतवर्षात्मकमित्यर्थः ॥ शतमिन्नु शरदो अन्ति देवा यत्र नश्चक्रा जरसं तनूनाम् पुत्रासो यत्र
वतः ८ पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः ॥ हे देवाः शरदः शतमपि अर्थात् आयुः अन्ति अन्तिके स्वल्पकालमेवेत्यभिप्रायः यत
एवमतो ब्रूमः नः अस्माकं आयुः मध्या मध्ये मा रीरिषत मा हिंसिष्ट किंच गन्तोः गन्तृ मा भवतीति अध्याहार्यं अकाल एव मा ग
च्छत्वित्यर्थः यत्र शरदां शते नोऽस्माकं तनूनां जरसं जरां चक्र कृतवन्तः जरानिमित्तमपि कृतवन्तः अर्थात् भवंत एव किंच यत्र।
शरदः शते पुत्रासः पुत्राः पितरो भवंति पुत्रा अग्रे अन्वयः ते यजमानजनिता भवंति हितकारिणश्च भवंति अथवा पुत्रा एव पितॄणां।

भार्यापुत्रपौत्रतनूभिः ४५ स्तुवंतः अर्थाद्भवतः ८

मौर्ध्वदैहिकं कुर्वाणाः पितरो भवंति पोषकत्वात् पितरः संपद्यंते अथ वा जीवदवस्थायामेव पोषकत्वात् पितर इव भवंति तथा
मं.दी. च यस्यामवस्थायामेव मदत्तमता भवति सामर्थ्ये एव मास्त्विति अभिप्रायः तदुक्तं संचिंत्य संचिंत्य तमुग्रदंडं मृत्युं मनुष्यस्यावि
७० चक्षणस्य वर्षासुसिक्ता इव चर्मवंधाः सर्वप्रयत्नाः शिथिलीभवंति॥ अदितिर्द्यौरदितिरंतरिक्षमदितिर्माता स पिता स पुत्रः विश्वेदेवा
अदितिः पंचजना अदितिरदितिर्जातमदितिर्जनित्वम्॥ द्यौः स्वर्गः अदितिः अस्तु न विद्यते दितिः खंडनं यस्याः सा अदितिः अविघ्नका
रिणी भवत्वित्यर्थः एवं सर्वत्रान्वयः पंचजनः कुवेरः जनित्वं जनिष्यमाणं॥ अपो अद्यान्वचारिषं यद्रसेन समसृक्ष्महि पयस्यय
स्वानग्न आगमं संसृज मा वर्चसा प्रजया धनेन च॥ हे अग्ने यत् अघः अघं अन्वचारिषं अनुचरितवानस्मि अवभृथादित्यर्थः यज्ञ
स्य रसेन वयं समसृक्ष्महि संसृष्टाः स्मः यत् पयस्वान् पयोयुक्तः सन् अत्रागमं आगतवानस्मि अतस्त्वं मामावर्च
सा तेजसा संसृज संयुक्तं कुरु प्रजया पुत्रादिना धनेन च संसृज॥ द्यौः शांतिरिति॥ द्यौरित्यादिषु सर्वत्र विभक्तिव्यत्ययः तथा
च या दिवि शांति या अंतरिक्षे शांति सा शांति मामां प्रति अधिभवतु इति शत्रुघ्नविरचितायां मंत्रार्थदीपिकायां दशकर्मपरिच्छेदः
अथ नवग्रहमंत्रव्याख्यानं आकृष्णेनेति देवपूजाप्रकरणे व्याख्यातं॥ इमं देवा इति॥ हे देवाः इमं राजानं असपत्नं शत्रुरहितं
सुवध्वं जनयत कुरुत एवं च महते क्षत्राय वीर्याय महते ज्येष्ठाय ज्येष्ठताय महते जानराज्याय जनसंबंधि राज्याय इंद्रस्य ७०

युष्माकं पुनः ब्राह्मणानां अमीअसौ सोमोराजा = ३

इंद्रियस्य इंद्रियाय वीर्याय सुवध्वमिति सर्वत्रान्वेति इमं अमुष्य पुत्रं कोर्थः अस्य यजमानस्य पितुः पुत्रं अमुष्यै अमुष्याय जमा
नमातुः पुत्रं इमं यजमानमित्यर्थः अस्यासपत्नादिकरणे हेतुमाह वः युष्माकं विशोविशः जनपदजातेः एष राजा अस्माकं ब्रा
ह्मणानां पुनः अमीअसौ सोमोराजा यद्वाह वः युष्माकं पुनः ब्राह्मणानां अमीअसौ सोमोराजा तस्माद्भवदर्थं प्रार्थनाक्रि
यते न तु स्वार्थमित्यभिप्रायः ॥ अग्निर्मूर्द्धेति ॥ अग्निः स्तूयते योयमग्निर्दिवः मूर्द्धा आदित्यात्मना द्युलोकस्य मूर्द्धा भवति अयमेव ॥ क
कुप् महाककुभ इति महन्नामसु पठितं अंतलोपे कृते एतद्रूपं अयमेव महानात्मा जगत इत्यर्थः अयमेवाग्निः पृथिव्याः प
तिः ईश्वरः नायकः तापपाकप्रकाशादिभिः सर्वाः प्रजाः अनुगृह्णातीत्यभिप्रायः किंच अयमेव अपां रेतांसि जिन्वति पुष्यति
अर्थात् रेतः कारणमुच्यते याः ताः आपः द्युलोकात् यंतीति तासां अपां कारणमिति जिन्वति प्राणिकर्माणि पुष्यतीत्यर्थः आहुति
परिणामभूतां वृष्टिं जनयतीति दर्शितं यद्वा अयमिति कुज उच्यते कुजोपि दिवो मूर्द्धेत्यर्थः तेन कुजप्रकाशतास्य संभव
ति ॥ उद्बुध्यस्वाग्ने इति ॥ हे अग्ने उद्बुध्यस्व उद्बुद्धो भव सप्रकाशो भव प्रतिजागृहि त्वं जागरणशीलश्च त्वं भव अतः इष्टापू
र्ते संसृजेथाः अर्थात् यजमानेन सह अयं यजमानोपि इष्टपूर्ताभ्यां संसृष्टो भवतीति शेषः इष्टयागादि पूर्तं तडा
कादि यद्वा अयं बुधः तथा च बुधोप्युद्बुद्धो भवतीत्यर्थः तेन बुधप्रकाशकतास्य मंत्रस्य भवति ततः अस्मिन्स

सहस्थाने ४।

धस्थैं अर्धा देवैः समानस्थाने आदित्यलोके विश्वे देवा यजमान आसीदति सीदंतु तथाच यजमानस्य विश्वदेवैः समा

मंधी दी ७१

नलोकता प्रार्थ्यते आदित्यलोके किंभूते अध्युत्तरस्मिन्सर्वोत्कृष्टे ॥ बृहस्पते इति ॥ हे बृहस्पते ऋतप्रजात ऋता सत्यात्प्र
जायते इति ऋतप्रजातः तत् द्रविणं अस्मासु धेहि द्रविणं किंभूतं चित्रं नानाविधं तत् कियत् अति अतिशयेन अर्यः ई
श्वरः अर्हात् पूजयेत् यच्च द्युमत् द्युतिमत् विभाति शोभते यूत जनेषु क्रतुमत् यज्ञवत् अभीष्टजनकत्वेन विभा
ति यच्च श्रवसा श्रवसा बलेन दीदयत् दीप्यते यस्य रक्षितारो भवंतीत्यभिप्रायः ॥ अन्नात्परिस्रुत इत्यादि ॥ प्रजाप
तिः प्रथमशरीरी अन्नात् हविर्लक्षणात् अन्नस्य हविर्लक्षणस्य रसं परिस्रुतः स्वधायाश्च रसं ब्राह्मणाः त्रयील
क्षणेन व्यपिबन् पयः सोमं च व्यपिबन् क्षत्रं च व्यपिबन् अन्नपाने च शरीरकरणं सर्वमेतत्सत्यं अनेन च ऋतेन।
त सत्यं संजाते यत्सोमे इंद्रियं वीर्यं संजातं किंभूतं वीर्यं विपाने लोहितात् विविक्ते य द्वावि पाने पानयोग्यं रावंच
अंधसः अन्नस्य शुक्रं रेतः भिन्नं अन्नात् संभूतमित्यर्थः अथ इदं पयः इंद्रस्य इंद्रियं अमृतं मधु च भवति ॥ श
न्नोदेवीति श्राद्धे व्याख्यातं ॥ कयानश्चित्र इति ॥ चित्रः चयनीयः इंद्र कया ऊत्या केन तर्पणेन नः अस्माकं स।
दावृधः सदाकाल वर्द्धयिता सखा च आभुवत् भूयात् आभवदित्याकारोऽग्रे वृत्ता सह संवध्यते कया च आ।

या× २

वृताकर्मणासदावृध: सखाचभूयात् आवृताकिंभूतया सचिष्ठयासचीतिकर्मनाम अतिशयितकर्मवत्या ऊतीतितृती
र्ष्ट्रेप्रथमा वोध्या सुपांसुपोभवंतीत्यादेश: ॥केतुंकृण्वन्निति॥ हेकेतो अकेतवे अज्ञाय केतुंज्ञानंकृण्वन्कुर्वन् सन् नवि
द्यते केतुर्ज्ञानं यस्यस: अकेतुस्तस्मै अकेतवे अपेशसे अरूपाय मर्याय मनुष्याय पेश: सुरूपंकृण्वन् एवंगु
णशरीर: सन् उषद्भि: उषोभि: समजायथा: सहजातोभवसि इतिनवग्रहमंत्रव्याख्या अथाधिदैवतानां
अवकंयजामहे इतिनीलसूक्ते व्याख्यातं श्रीश्चते इत्युत्तरनारायणे॥ यदक्रंद इति॥ हेअर्वन् अश्वतेनवमहि
उपस्तुत्यंस्वहेतु: ससंजातेकाविवश्येनस्य पक्षाविवलुप्तोपमेतत् हरिणस्यवाहूवाहूइवअत्रवाहुशब्देना
ग्रेचरणद्वयमुच्यते तथाच यथा पक्षाभ्यांश्येन: प्रशस्तंगच्छति तेन तैतस्य स्तुतिहेतूतघातवापितकिंयत्रप्रथमं
जायमान: सन् अक्रंद: शब्दमकरो: अश्वमेधे कर्मणिसाधुत्वेन विशिष्टसाधनमहिमा एवंप्रकारेणकिंकु
र्वन् समुद्रात् उद्यन् उद्गच्छन् उतवापुरीषात् जलात् विप्रोरराटमसि इतिदेवपूजायांव्याख्यातं॥ आब्रह्मन्ब्र
ह्मणइति॥ हेब्रह्मन् अस्यन: अस्माकंयजमानस्य राष्ट्रे देशे ब्राह्मण: ब्रह्मवर्चस्वी आजायतां ब्रह्मवर्चसेवे
द: तदस्यास्तीति ब्रह्मवर्चसी वेदवानित्यर्थ: ॥आजायतामिति॥ आब्रह्मन्नित्यत्रपठितेनाऽऽसंबध्यतेवेद

म. ध्रु. दी. ७२ साध्याः सर्वा वैदिक्यः क्रियाः इति प्रथमं सर्एवाशास्यते किंच राजन्यः क्षत्रियः शूरः आजायतां इषव्यः इषु
कुशलः अति व्याधि अत्यंत व्यधनशीलः महारथश्च आजायतां रथेनैकेनयः शत्रून् साहकारो व्रज
त्यलं महारथः सविज्ञेयो युद्धशास्त्रविशारदैः इत्यादिप्रतिपादितः किंच धेनुः दोग्ध्री दुग्धवती आजाय
तां किंच अनड्वान् वृषभः वोढा शकटादिवाहकः आयतां सप्तिः अश्वः आशुः शीघ्रश्च आजायतां योषा स्त्री
पुरंध्रीः उत्कृष्टरूपवती आजायतां रथेष्ठाः रथस्य रथी जिष्णुः आजायतां युवा तरुणः सभेयः सभा
र्हः आजायतां वीरः युद्धवीरो दानवीरश्च अस्य यजमानस्य राष्ट्रे इति सर्वत्रान्वेति किंच नः अस्य यजमानस्य
निकामे निकामे देशे देशे पर्जन्यः मेघः अभिवर्षतु किंच ओषधयः फलवत्यः सेत्यः पच्यंतां किंच योगः क्षेम
श्च कल्पतां भवतु अलब्धलाभो योगः लब्धस्य परिपालनं क्षेमः सजोषा इंद्रेति हे इंद्र यस्त्वं सजोषः समानपान
भोजनः अर्धा देवैः स हते तां ब्रवीमि मरुद्भिः सगणः सहगणः समानगणो भूत्वा मिलित्वा सोमं पिबत तस्त्वं वृत्र
हा वृत्रनाशको भविष्यसि हे शूर विद्वान् जनः त्वं सोमं पीत्वा शत्रून् वृत्रप्रमुखान् जहि नाशय अथ मृधः संग्रा

मात् अपनुदस्व द्विष अर्थात् हतोवशिष्टान् शत्रून् नः अस्माकं विश्वतः सर्वत्र अभयं कृणुहि कुरु ॥ मं॰ ॥ असि यमोऽसी
ति ॥ हे अर्वन् अश्व यमोऽसि आदित्योऽसि त्रितः त्रिस्थानः इन्द्रश्च त्वमसि केन निमित्तेन गुह्येन व्रतेन कर्मणा यज्ञेनेति या।
वत् किं च त्वं सोमेन सह समया मध्येन विपृक्तः व्यतिभिन्नः सोमांगसंभिन्न इत्यर्थः तथा च ते तव दिवि स्वर्गे त्रीणि ब
धनानि ऋग्यजुःसामात्मक त्रयीलक्षणान्याहुः वदंति ब्रह्मवादिन इति शेषः एवमश्वः स्तूयते ॥ कार्विरसीति ॥ काती।
यस्मान्न प्रकरणे व्याख्यातं ॥ चित्रावसो स्वस्ति ते पारमशीयेति ॥ रात्रिर्वै चित्रावसुरिति श्रुतेः हे चित्रावसो रात्रे मम स्व
स्ति कुशलमस्तु स्वस्त्या च ते पारमशीय व्याप्नुयां व्यक्तमित्यर्थः अथ प्रत्यधि देवतानां अग्निदूतमिति व्याख्यातं देव।
पूजायां ॥ अप्स्वंतरमृतमप्सु भेषजमिति ॥ अश्वानभिषिंचति ॥ अप्सु अमृतं अवस्थितं वर्तते अप्सु भेषजं अवस्थितं व
र्तते तेऽश्वाः तेन यूयं वाजिनः अन्नवन्तः भवत वाजमन्नं उत्यद्वांतरे अपां प्रशस्तिषु प्रशस्तेषु भोगेष्वपि भवंतः
किंच हे देवीः आपः देव्यः आपः यो वः ऊर्मिः कल्लोलः तेनायमश्वः वाजमन्नं सेत् संभजेत् यद्वा सि उपात् व।
धीयात् सिनोतेर्वा एतद्रूपं लिङि कल्लोलः किंभूतः प्रतूर्तिः प्रकर्षेण त्वरणशीलः ककुन्मान् उन्नतः उन्नतो वृष
स्कंधप्रदेशः ककुच्छब्देनोच्यते तद्युक्तत्वात् ककुद्शब्देनोन्नत उच्यते बहुभिरुदकैः कृत इत्यर्थः वाजसावा

128

जसं भक्तं वाजमन्नं॥ स्योना पृथिवि नो भवेति॥ हे पृथिवि नः अस्माकं स्योना सुखरूपा भव अनृक्षरा च भव नविद्य
ते ऋक्षरो यस्याः सा अनृक्षरा ऋक्षरः कंटकः निवेशिनी च भव हे पृथिवि अस्माकं शर्म शरणं पच्छ त्वं कथंभूता स\
मं.य. दी. ७३ प्रथा सर्वतः पृथु इदं विष्णुरिति आद्य प्रकरणे व्याख्यातं॥ त्रातारमिंद्रमिति॥ अतो हेतो इंद्रं ह्वयामि आह्वयामि
इंद्रं किंभूतं त्रातारं रक्षितारं पुनः किंभूतं अवितारं अवनकर्त्तारं हवे हवे आह्वाने सुहवं शोभनाह्वानं शू
रं विक्रांतं शक्रं पुरुहूतं बहुभिराहूतं पुरुशब्दो बहुवचनः स इंद्रः नः अस्माकं स्वस्ति धातु दधातु पुनः
किंभूतः इंद्रः मघवान् मघं धनं तद्वान्॥ नियुत्वान्वायो इति॥ हे वायो यतः सुन्वतः अभिषवं कुर्वतः ज
नस्य गृहं गंतासि अतस्त्वां ब्रवीमि नियुत्वान् गुणवान् भूत्वा आगहि आगच्छ अयमपि शुक्रो ग्रहः ते\
त्वां प्रति अयामि आगच्छतु वचनव्यत्ययः छांदसः तथा च शुक्रादीनां ग्रहाणां त्वमेव स्थानमित्यर्थः
॥प्रजापते न त्वा देवतान्य इति॥ हे प्रजापते त्वत् त्वतः अन्यः देवताविशेषः एतानि विश्वा रूपाणि विश्वा
निरूपाणि अर्थात् वर्त्तमानानि तानि च भूतभविष्याणि च परितः सर्वतोभावेन न बभूव यतत्व ७३

मेव सर्वं चराचरमयः नान्य इत्यर्थः यद्वा न व भूव विश्वानि रूपाणि कर्त्तुं शक्तो न वभूवेत्यर्थः अतो यत्का
मा वयं ते त्वां जुहुमः नः अस्माकं तदस्तु किं च ते नवयं रयीणां धनानां पतयः स्याम भवेम ॥ नमोस्तु सर्पे
भ्य इति ॥ तेभ्यः सर्पेभ्यो नमोऽस्तु ते के ये के च न पृथिवी पृथिव्यां ये च अंतरिक्षे ये च दिवि स्वर्गे संति तेभ्यः सर्पे
भ्यो नमः अदाराद्यर्थं पुनर्ग्रहणं ॥ ब्रह्म यज्ञानमिति ॥ ब्रह्म आदित्यरूपं प्रथमं पुरस्तात् प्राच्यां दिशि जज्ञा
नं जायते ततोनंतरं सीमतः मर्यादानः मध्यस्थानात् सुरुचः सुरोचमानान् इमान् लोकान् स्वप्रा
काशेन वि आवः आवः व्यावृणोति विवृतान् करोति स बुध्न्या स एवादित्यः बुध्न्याः उपमाः दिशः व्यावृ
णोति बुध्नमंतरिक्षं तत्र भवा बुध्न्या उपमीयंते अस्यां स्थितानि भूतानीति उपमा दिशः उच्यंते दिशः किंभूताः
अस्य विष्ठाः अस्य जगतः विष्ठाः विविधं तिष्ठंत्यस्यामिति विष्ठाः किं च सतः विद्यमानस्य असतः अ
मूर्त्तस्य योनिस्थाने अमूर्त्तस्याप्रत्यक्षवाय्वादेः आदित्यः किंभूतः वेनः कांतः मेधावी वा एवं दिशो
लोकान् भूतानि वा आदित्य एवाभिव्यनक्ति नान्य इति सूर्यः सूयते अथ लोकपालानां त्रातारमि

ति व्याख्यातं अग्निर्दूतमित्यपि आसि यम इत्यपि एषते निरृते भाग इत्यपि इमं मे वरुण इत्यपि ॥ वातो वा मनो
य॰ वे॰ दी॰ ७४ वेति ॥ अश्वं पुनक्ति वा शब्दः समुच्चयार्थः हे अश्व एते त्वां सं मंत्र इत्यध्याहार्य्यं एते के वातो वा वात अश्व मनो
वा मनश्च गंधर्वाः सप्तविंशतिश्च नक्षत्राणीत्यर्थः त्वयि जवं च दधातु तत्र हेतुः ते अग्रे प्रथमं अश्वं अयुंजन्
ते अस्मिन् जवं वेगं आदधुः आहितवंतः तथा च वातादय एव पूर्वं अश्वमयुंजन् त एव तत्र वेगमाद
धुः अतस्त एव भवंतं युंजंतु ते च त्वयि जवं आदधत्विति वाक्यार्थः ॥ कुविदंग यवमंत इति ॥ हे सोम अं
ग कुवित् क्षेत्रकुविच्छदो निवर्तनमितक्षेत्रे यथा यवमंतः गृहीतयावाः केचिज्ज्ञानपदाः यवनिन
र्तनं दाति लुनंति दाप् लवने किं कृत्वा अनुपूर्वं आनुपूर्व्येण वियूय पृथक्कृत्य निश्चयेत्यर्थः एवं इह
एषां यजमानानां यव इव भोजनानि भोज्यानि वस्तूनि कृणुहि कुरु केषां ये बर्हिषो बर्हिः स्थिताः यज
मानाः नम उक्तिं यजंति नमः अन्नं हविर्लक्षणं गृहीत्वा उक्तिं योग्यां स्वाहादिकां विधाय यजंति यागं
कुर्वंति ॥ तमीशानं जगत इति ॥ तथा तं ईशानं रुद्राधिपतिं अवसे अवनाय तर्पणाय वयं हूमहे आह्वयामः

ईशानं किंभूतं जगतः जंगमस्य तस्थुषः स्थावरस्य च पतिं प्रभुं किंभूतं धियंजिन्वं धिया बुद्ध्या जिन्व
ति प्रीणाति धियंजिन्वः यद्वा कर्मणा जिन्वति तथा कथं यथा नः अस्माकं पूषा सूर्यः वेदसाधनानां
वृधे वर्धनाय असत् भूयात् किंच अदब्धः अनुपहिंस्यः सन् रक्षिता भवतु पायुः पालयिता च भ
वतु स्वस्तये च भवतु नमोस्त्विति च व्याख्यातं ॥ ब्रह्मयज्ञानमिति च ॥ विश्वकर्मन् हविषेति ॥ हे विश्वकर्म
न् अनेन हविषा महाव्रतीलक्षणेन वर्धनेन वर्धयित्वा इंद्रं जगतस्त्रातारं अकृणोः कृतवानसि अवध्यं च कृतवा
नसि तस्मै च एवंभूतप्रभावाय इन्द्राय पूर्वीः पूर्वे विशः मनुष्या वशिष्ठप्रभृतयः समनमंत सन्नताः इदानीं
तना अपि किंच यथा यतः पंचम्यर्थे थाल् यतः कारणात् अयम् इंद्रः उग्रः उद्गीर्णवज्रः विहव्यः अस
त् अभवत् विविधेषु कार्येषु हूयते इति विहव्यः तस्मात् हविः सामर्थ्यादिन्द्रस्यायं प्रभाव इत्यभिप्रायः अ
थ विना यकारादिपंचकस्य गणो नांता अग्ने वे अग्ने वके इति वातो वेति च व्याख्यातं ॥ ऊर्ध्वा अस्य समिध इति ॥ अस्या
ग्नेः प्रजापतिरूपस्य ऊर्ध्वाः देवयानमार्गगामिन्यः समिधो भवंति शोचींषि अर्चींषि चोर्ध्वाः ऊर्ध्वानि शुक्ला
शुक्लानि च भवंति किंच द्युमत्तमाः द्युमत्तमानि अग्नेः किंभूतस्य सुप्रतीकस्य सूनोः सुप्रतीकस्य सुमुख

स्य अर्थात् यजमानस्य सूनोः पुत्रस्य जातस्य सद्य एवमग्निं जनयति धारयाति च एवंभूतं वह्निं स्तुम इति
मं॰ पं॰ दी॰ ७५ वाक्यशेषः॥ अश्विनो भैषज्येति॥ भिषक् वैद्यस्तस्य कर्म भैषज्यं अश्विनोः अश्विनीकुमारयोः भैषज्ये
न भिषक्कर्मणा त्वां अभिषिंचामि किमर्थं ब्रह्मवर्चसाय वेदाय अथ सोमसूक्तं॥ आषाढं युत्सु पृतना
स्विति॥ हे सोम जयंतं त्वां अर्थात् परसैन्यं अनु वदेम उत्सारयामः त्वां किंभूतं अषाढं असहनं अनभिभूतं
[illegible] वायुत्सु युद्धेषु पृतनासु सेनासु पप्रिं पालयितारं पृ पालनपूरणयोरित्येतद्रूपं पुनः किंभूतं स्व
र्षं स्वर्दिवं सुनोतीति स्वर्षस्तं स्वर्षं अप्सां अपां सनितारं वृजिनस्य वलस्य गोपां गोप्तारं भरेषु जां जयते
रेतद्रूपं संग्रामेषु जेतारं सुक्षितं सुनिवासं सुश्रवसं कल्याणकीर्तिं न प्रसिद्धं॥ सोमो धेनुं सोम इति॥ सो
मः स्तस्मै धेनुं ददाति सोम एवार्वतं अश्वं ददाति आशु शीघ्रगतिं सोम एव वीरं पुत्रं ददाति पुत्रं किंभूतं क
र्मण्यं कर्मसु साधुं सादन्यं सदने गृहे साधुं विदथ्यं विदथे यज्ञे साधुं सभेयं सभार्हं पितृश्रवसं पितुर
नुशासने स्थितं विनीतं तस्मै कस्मै अस्मै सोमाय यो यजमानः ददासत् ददाति॥ त्वमिमा ओषधीरिति॥ हे
सोम इमा विश्वाः सर्वा ओषधीः त्वं अजनयः जनयसि त्वं अपः त्वं गा अजनयसि त्वं उरु विस्तीर्णं।

अंतरिक्षं आततन्थ त्वं विततवानसि त्वं ज्योतिः तमः विववर्थ विवृणोषि तमस्त्वमेवापनयसीति स्तुतिः॥ मं॥ देवेन नो मनसे
ति॥ दैवेनेति प्राप्ते तद्धितलोपः छांदसः हे देव सोम देवेन मनसा नः अस्माकं सह सावत् सहस्वत् वलवत् आकारः
छांदसः रायो धनस्य भागं अभियुध्य युध्यति र्गतिकर्मणो मध्ये पठ्यते अत्रैतौ तर्भावितण्यर्थौ त्र गृह्येते तेन अ
भियुध्य अभिगमय देहीत्यर्थः गावेदान प्रवृत्तं त्वां माकश्चिद्दानतः प्रतिवध्नीयात् तनतिः प्रतिवंधार्थः कुतस्त्व
मेवमुच्यसे इति चेत् यतस्त्वं वीर्यस्य स्वकीयवीरकर्मणः ईशिषे ईश्वरोसि किंच उभयेभ्यः उभयलोकप्रा
प्त्यर्थं प्रचिकित्स व्याध्यपगमं कुरु गविष्टौ च गोशब्देनात्रामुष्य लोक उच्यते तथा च स्वर्गेषणायांभूतायां
त्वमस्मान् प्रचिचित्स यथा स्वर्गं पश्येम तथा कुर्विति वाक्यार्थः इति श्रीमदुव्वटविरचितायां मंत्रार्थदीपिका
यां नवग्रहादिमंत्रव्याख्यापरिच्छेदः समाप्तः समाप्तं कर्मकांडं ज्ञानकांडमिदानीं प्रस्तूयते स्वशिष्यं ग
र्भाधानादिभिः संस्कारैः संस्कृतशरीरमधीतवेदमुत्पादितपुत्रं यथावदनुष्ठितयज्ञमपाये निःस्पृह
यमनियमव्रतं अतिथिपूजापनीतकल्मषमुत्तममुपपन्नं पुत्रवच्छिष्यमाह॥ मं॥ ईशावास्यमिदं सर्वमि
ति॥ ईशरैश्वर्ये ईष्टे इति ईट् ईशशब्दस्य तृतीयांतस्यैतद्रूपं सर्वमिदं ईशा ईशेन वासनीयं आच्छादनी

येममेदमित्यनेनज्ञानेनेतिशेषः वसआछादने इत्यस्यैतद्रूपं इदमितिप्रत्यक्षतोनिर्दिशति यत्किंचिदिति 134
मं॰घे॰ टी॰७६ चशब्दोभिन्नक्रमः तथा तत्सर्वमेव तथा च तेन ममताज्ञानेन सर्वेण त्यक्तेन स्वस्वामिसंबंधे न च त्यक्तेन स
ताभुंजीथाः भोग्यानितिशेषः अतश्च मागृधः ममेदमिति बुध्याऽभिकांक्षां माकृथाः गृधुअभिकांक्षा
यां तत्रहेतुमाह कस्यास्विद्धनमिति स्विदिति निपातोवितर्कवचनः कस्य पुनरेतद्धनं न कस्यचिदपीत्य
भिप्रायः सर्वार्थानिहि सर्ववस्तून्युच्यंते तथाहि स्त्रियं पतिरन्यथा भुंक्ते अन्यथा पुत्रः अन्यथापि त्रादिः
एवं च कटककेयूरादीन्युपकरणानि अन्यं च पुरुष मुपतिष्ठमानानि साधारणान्येव असाधा
रणेपि च ममताबुद्धिर्भवितुमर्हतीत्यभिप्रायः तथा च सर्वार्थेषु वस्तुषु यः स्वस्वामिसंबंधो ममेदमि
ति बुद्धिश्च साऽविद्या तन्निवृत्तौ स्पृहानिवृत्तिः निस्पृहस्य योगेऽधिकार इतिवाक्यार्थः निःस्पृहस्या
पि योगिनो ज्ञाननिमित्ते कर्मण्यधिकार इत्येतद्दर्शनार्थमाह कुर्वन्नेवेहकर्माणि जिजीविषेच्छतं स
माः एवं त्वयि नान्यथेतोस्ति न कर्म लिप्यते नरा इत्युक्तसाधनानि कर्माणि कुर्वन् आचरन्नेवञ्च। ७६

र्थात् न त्यजन्नेव इह लोके शतं समाः जिजीविषेदिति पुरुषव्यत्ययः कार्यः पुरोवर्त्तिविषयत्वादस्य मंत्रस्य
तेन जीवितुमिच्छेः योगोचितपथ्याहितभक्षणेन शतं समा इति पुरुषायुष उपलक्षणार्थं एवं त्वयि मुक्तिर
स्तीति शेषः नान्यथेतोस्ति इतः प्रकारात् अन्यथा मुक्तिर्नास्तीत्यर्थः ननु कर्मकरणे कर्मफलेन भवितव्यं
तत्कथं मुक्तिरित्याशंक्याह न कर्म लिप्यते नरे न हि मुक्त्यर्थं कर्म क्रियमाणं नरे मनुष्ये लिप्यते संब
ध्यते मुक्तिप्रदाने नोपक्षीणशक्तित्वादित्यर्थः अन्यं मंत्रमाह ॥ असुर्या नाम ते लोका इति ॥ अत्र परमात्म
स्वरूपमजानंतो देवादयोपि असुरा उच्यंते तेषां स्वभूता असुर्याः नामशब्दोनर्थको निपातः लोक्यंते
भुज्यंते कर्मफलान्यत्रेति लोकाः स्वर्गादयः तथा च असुर्याः असुरसंबंधिनः ते प्रसिद्धाः लोकाः
स्वर्गादयः अंधेन तमसा अज्ञानलक्षणेन तमसा वृताः सर्वतः आच्छादिताः तान् लोकान् ते जना
इत्थंभूतकर्माणि कुर्वंति ते हि तान् लोकान् प्रेत्य अपि गच्छंति जनिता म्रियंते मृता च जायंते इत्येवम
हं ते विनाशं प्राप्नुवंति इदानीं विविदिषामारभ्य यमनियमवतां मुमुक्षूणां यथा मृतं परं ब्रह्म त

136

त्वेनोपास्यं तदाह अनेजदेकमिति अनेजत् स्थिरं तत्त्वरूपमास्ते एकमद्वितीयं विज्ञानघनरूपे
म॰ प्र॰ दी॰ णमनसोजवीयः मनसस्तावच्छीघ्रतरं भवति तस्मादपि शीघ्रतरं प्रसाददानेनेति शेषः नैनद्देवा
७८ आप्नुवन् पूर्वमर्षत् एतद्देवाः प्राणाः नाप्नुवन् सूक्ष्मत्वात् एतत्किंभूतं पूर्वं सर्वस्य कारणत्वेन भू
तं पुनः किंभूतं अर्षत् अविनश्यत् रिषतिर्हिंसार्थः अनादिनिधनमित्यर्थः तद्धावतोन्यानत्येति तत्
दः स्थाने पदो वृत्तिः पद्भ्यां धावतोन्यान् सतो वागिंद्रियप्रभृतीन् अत्येति तिष्ठदेव सत् अतिक्रम्य
र्थः गच्छति व्यापकत्वादित्यर्थः तस्मिन्नप इति अपः कर्म्माणि मातरिश्वा वायुः तस्मिन्कर्माणि द
धाति स्थापयति मातरिश्वा समष्टिवायुः समष्टिवायोः सर्वाणि जनकृतानि होमकर्माणि स्था
प्यंते स्वाहा वातेधाः इति वायुप्रतिष्ठिताभिधानात् समष्टिव्यष्टिरूपे रूरमावितिस्तत्र पाठः वायुर
पि यस्मिन् कर्म्माणि स्थापयति यागहोमादीनां परं यद्विधानमित्यर्थः एवंकारणभूतमात्मानमु
पदिश्याद्य इदानीं कार्यरूपेणोपदिशति तदेजति तन्नैजतीति तदेव सर्वकार्यरूपेणावस्थितं। ७८

सत एजनक्रिया वद्भवति प जूकंपनेतदेव नैजति न क्रिया वद्भवति स्वरूपेणावस्थितं भवति तद्दूरेवर्ष
कोट्याप्यविदुषाम प्राप्यत्वात् दूर इव तदंतिके उ शब्द एवकारार्थः तदेव चांतिके समीपे अत्यंते।
विदुषामात्मत्तत्वज्ञानेन सुलभं अथवा तद्दूरे आदित्यनक्षत्रादिरूपेण तदेवांतिके पृथिव्यग्न्यादिरूपेण सर्वं
खल्विदं ब्रह्मेत्येतद्दर्शनार्थोयं ग्रंथः तदंतरस्य तदेवास्य प्राणिजातस्य विज्ञानरूपेणांतः अंतर्वर्त्ति तदेवास्या
णिजातस्य वाह्यतः जलरूपेण शरीररूपादिना वाऽवतिष्ठते चेतनारूपमनंतं ब्रह्मेत्यर्थः॥ यस्तु सर्वाणि भूता
नुः न्यात्मन्येवानुपश्यतीति॥ नु शब्दोन्यापेक्षाया वर्त्तनार्थः यः पुनः सर्वाणि भूतानि चेतनाचेतनरूपाणि आत्म
न्येवानुपश्यतीति सर्वाणि भूतानि न मद्व्यतिरिक्तानि किंत्वहमेव परं ब्रह्मेति सर्वभूतेषु ब्रह्मरूपाध्या।
त्मविज्ञानघनानंदैकत्ववेदिनः कुतो विचारः प्रवर्त्ततां ततो निरंतरात्यंत विशुद्धात्मदर्शनात्॥ न विचिकि।
त्सति इति॥ ननु शोकमोहौ दृश्येते तत्कथमेकत्वमुपपद्यते आत्मनो नानात्वे हि तौ संभवत इत्यत आह।
यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः तत्र को मोहः कः शोकः एकत्वमनुपश्यतः यस्मिन्नव
स्थाविशेषे सर्वाचेतनानि भूतान्यात्मैवाभूत् आत्मैव भवति न भिन्नानि आत्मैवेदं सर्वं सर्वं खल्विदं

ब्रह्मेतिजानाति तद्विजानतः पुरुषस्य योगिनः को मोहः कः शोको न कोपीत्यर्थः हेतुमाह एकत्व
मं-थं टी- मनुपश्यतः तथाचशुद्धचित्तस्य शास्त्रविहितैकत्वदृष्टेरात्मनोऽनानात्वभावेनिर्णीतवतः शोकमो
७८ हहेत्वभावात् कथं शोकः कथं वामोह इत्यर्थः अपगतरागद्वेषविचिकित्सस्य विदुषः एकत्वमनु
पश्यतः किंभवतीत्यतआह "स पर्य्यगाच्छुक्रमकायमिति" य एवमात्मानं पश्यति स तं पर्य्यगात् परिगच्छ
ति तं किंभूतं शुक्रं निर्मलं विज्ञानघनानंदस्वभावं अचिंत्यशक्तिं अकायं न विद्यते कायः शरीरं यस्य अ
कायः तं अव्रणं क्षतशून्यं कायरहितत्वादेव अस्नाविरं स्नायुरहितं कायरहितत्वादेव शुद्धं सत्वरज
स्तमोभिरनुपहितं अपापविद्धं क्लेशकर्मविपाकाशयैः पापैरसंस्पृष्टं अकायमव्रणमस्नाविरित्यर्थः
पुनरुक्तमपि न दोषाय अभ्यासेभूयांसमर्थं प्रतिपादयतानेन ग्रंथेन तथादृशं ब्रह्मैव प्रतिपाद्यतेइ
त्यर्थः आत्मोपासनस्य फलमाह कविर्मनीषीत्यादिपञ्च कविः क्रांतदर्शनः आत्मोपासनायुक्तः स या
थातथ्यतोऽर्थान् व्यदधात् यथास्वरूपमर्थात् विहितत्यक्तस्वस्वामिसंबंधैरर्थैरुपभोगं कृतवान् शा
श्वतीभ्यः समाभ्यः अनंतवेषं प्राप्तेचकारांकृतवानित्यध्याहारः स किंभूतः मनीषी मनसा सूक्ष्माण

मर्थानांविशेषज्ञः परिभूः परिसर्वतोभावेनज्ञानवान्भवतीतिपरिभूः तेनरूपेणभविताअवस्थितः स्व
यंभूः स्वतःसिद्धः नतुयः कर्मनिष्ठोलोकः सोंतरालेभवति तस्मात्सोपिपरिगच्छति शुक्रमकायमव्रणमि
ति अंधंतमः प्रविशंतियेसंभूतिमुपासतेततोभूयइवतेतमोयउसंभूत्यां रताः तत्रप्रथमंलोकायतिका
निंद्यंते तेषामेतद्दर्शनं जलबुद्बुदवज्जनाः मदशक्तिवज्ज्ञानमितियेअसंभूतिंउपासतेभूतस्यसतः संभवो
जन्मनास्तिशरीरादस्मान्मुक्तिरेवनहिविज्ञानात्माकश्चित् अथनधर्मोस्ति यः शरीरांतरेणसंबध्यते ए
ते×६ वंयेउपासतेअंधंतमः अज्ञानलक्षणंतमः प्रविशंतिभूयः पुनस्ततोपिबहुतरंतमः प्रविशंतिइवशब्दो
नर्थकः उकारोवधारणार्थः तथाचयेसंभूत्यामात्मन्येवरताः संभूतिरात्मा आत्मैवास्तिनान्यत् किंच
नकर्मज्ञानयोः कर्मकांडज्ञानकांडयोर्वासंबंधोनास्त्येवेति येषामभिप्रायइत्यर्थः अन्यदेवाहुः संभ
वादन्यदेवेति संतोबुद्धिबलेनविभावयंतितदाहुः संभवात् आत्मज्ञानात् अन्यदेवफलमाहुः आत्मज्ञानव
तामुत्कृष्टंफलमित्यर्थः अन्यच्चफलमसंभवात् असंभवपरिज्ञानादाहुः इतिशुश्रुम वयंश्रुतवंतः
धीराणांवचांसिकेधीरास्तेयेनः अस्माकंतत् ब्रह्मविचचक्षिरे आख्यातवंतः संभूतिंचविनाशंच

चक्षि

मं·थै· यस्तद्वेदोभयं सह विनाशेन मृत्युं तीर्त्वा संभूत्यामृतमश्नुते ॥ समस्तस्य जगतः संभवहेतुं संभूतिं ई
दी· श्वरं ततः परं विनाशं च शरीरं च तज्ज्ञानहेतुत्वेन यो वेद जानाति आत्मज्ञानोत्पत्तिहेतुकर्माणि करोतीति
७२ यावत् स विनाशेन शरीरेण मृत्युं संसारं तीर्त्वा उत्तीर्य संभूत्या आत्मपरिज्ञानेनामृतत्वमश्नु
ते प्राप्नोति केवलं ज्ञानमेव नार्थसिद्धये किंतु कर्मापीत्याह अंधं तमः प्रविशंति येऽविद्यामुपासते त
तो भूय इव ते तमो य उ विद्यायां रताः ते अंधं अज्ञानलक्षणं तमः प्रविशंति येऽविद्यां स्वर्गार्थानि कर्मा
णि उपासते अनुतिष्ठंति ते ततोपि भूयो बहुतरं तमः प्रविशंति ये विद्यायामेव रता उकार एवकारार्थः
आत्मज्ञानरताः त्यक्तकर्माण इत्यर्थः अन्यदेवाहुर्विद्यया अन्यदाहुरविद्यया इति शुश्रुम धीराणां
ये नस्तद्विचचक्षिरे संतः विद्यायाः आत्मज्ञानात् अन्यदेव फलमाहुः अविद्यायाः कर्मणः अन्यच्च फलमा
हुः इति शुश्रुमः इति व्याख्यातं विद्यां चाविद्यां च यस्तद्वेदोभयं सह। अविद्यया मृत्युं तीर्त्वा विद्ययामृत
मश्नुते विद्यां चात्मज्ञानं चाविद्यां च कर्म च यस्तदुभयं सह वेद एकीभूतं जानाति ज्ञानातिशयेन कर्मकांडं
ज्ञानकांडस्य गुणीभूतं जानातीत्यर्थः एककार्यकारित्वेनैकत्वमिह विवक्षितं सोऽविद्यया कर्मकांडेन मृत्युं

नाx४

तीर्त्वा उत्तीर्य विद्यया परब्रह्मज्ञानेन अमृतं मोक्षं अश्नुते प्राप्नोति इदानीमित्थं कृत ब्रह्मोपासनस्य योगि
नः शरीरपातोत्तरं प्राप्तव्यगतिसिद्ध्यर्थं प्रार्थनामाह वायुरनिलममृतमथेदं भस्मांतं शरीरम् ओं क्र
२ तो स्मर क्लृवे स्मर कृतं स्मर कृतं स्मर अत्र वायुग्रहणं सप्तदशलिंगोपलक्षणार्थं वायुः प्राणवायुः अनि
लं स्वकीयं रूपं भजतां इति शेषः कं अनिलं अमृतं यो न विनश्यति ते अंतः शरीरव[ा]... प्राणः स्वभावेना
वतिष्ठत इत्यर्थः तस्मिन्नारब्धकार्ये प्रदेशे रागादयो वायुकार्याः स्वभावेना... र्त्तंति अपापगत।
प्राणस्य शरीरस्य कथमवस्थानमित्यत आह अथेदं भस्मांतं शरीरं भवतीत्यध्याहार्यं मुक्तस्य।
पुनः शरीरसंबंधो नास्तीति ध्वनितं अथ संचरतो वायोर्विशिष्टस्थानप्रतिपत्त्यर्थं भगवानाग्नयोवस्था
नं भवति वायुरनिलममृतमथेदं भस्मांतं शरीरं भवति ते आत्मानं ओमिति आमंत्रयेते क्रतो हे क्रतो स्मर
क्लृवे स्मर क्लृवे कर्म कृतं स्मर कर्म कृतमित्यभ्यास आदरार्थः पुनरन्येन मंत्रेण मार्गं याचते "अग्ने नय।
सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम।"
हे अग्ने नः अस्मान् सुपथा शोभनमार्गेण नय प्रापय राये धनाय यज्ञफलाय किंच हे देव दानादिगु।

142

णा युक्त विश्वानि सर्वाणि वयुनानि प्रज्ञानानि विधेहि मयीति शेषः त्वं किंभूतः विद्वान् सर्वज्ञानानः नहि त
मे॰ यं॰ दी॰ वज्ञानशक्तीनां परिमाणमस्तीत्यभिप्रायः किंच अस्मान् अस्मत्तः एनः पापं युयोधि पृथक्कुरु युअ
८० मिश्रणे एनः किंभूतं जुहुराणं कुटिलीकर्तुमिच्छति हूर्छ कौटिल्ये सन्नन्तः हूर्छतेः सनो लुकुलोपश्चे
ति शानच् प्रत्ययः तथा च क्रियासु हूर्छितुमिच्छति कुटिलीकर्तुमिच्छति यत् एनः अभिलषतो मम क्रि
या प्रतिबंधकं यथा य तदित्यर्थः तत्र हेतुमाह भूयिष्ठां ते नमउक्तिं विधेम ते तव भूयिष्ठां बहुतमां न
मउक्तिं विधेम कुर्म इत्यर्थः नमउक्तिर्भणनं तथा च नम इति हविर्लक्षणोनोपस्थि[illegible]र पुरोनुवाक्याया
अ जं वचनस्यानमउक्तिः तामित्यर्थः आदित्यं प्रार्थयते हिरण्मयेन पात्रेण स[illegible]स्यापिहितं मुखम्
तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये हिरण्मयेन पात्रेण ज्योतिर्मयेन [illegible]ति यावत् सत्यस्य ब्र तं
ह्मणः मुखं स्वरूपं अपिहितं आवृतं अतो हे पूषन् तत्तेन प्रकारेण त्वं द्वारम[illegible]यावृणमपि पुरुषेपि नैः=८
प्रकाशं कुरु यथा योसौ आदित्ये पुरुषः सोसौ अहमिति पश्यामीति मण्डलोतर्वर्ती पुरुषः

८०

143

मं. ज्ञा.

सवाअमृतेन ज्योतिषापिहृतो न दृश्यते तत्र श्रुतिः प्रमाणं तथाहि स एव एव मृत्युर्य एष एतस्मि
न्मंडले पुरुषो येन तदमृतं यदेतदर्चिर्दीप्यते तस्मान्मृत्युर्न म्रियते मृते स्ये[illegible]स्तस्माद्धि न दृश्यते।
मृते ह्येतरिति यदुक्तं हिरण्मयेन पात्रेणेत्यत्र यच्चोक्तं अनेजदेकमित्या[illegible]ः अमृतं तदेत ब्रह्म
खमाकाशं न तुल्यते न व्यापकं प्रतिभाति हलायुधे वा उवटेऽपि वार्घास[illegible]विधे योमविना
वलेयः रत्नाकरे किं मणयो न संति ततः समाकर्षति यः स धन्यः १ इति[illegible]महाराजाधिरा
जश्रीधर्मचंद्रकारित महामहोपाध्यायश्रीशत्रुघ्नकृत मंत्रार्थदीपिकायां ज्ञानकांडव्या।
ख्यानं समाप्तमिति — लेखक पाठकयोः शुभमस्तु सर्वथा संवत् १९८५ पौष मासे कृष्ण
पक्षे तृतीयायां गुरुदिने — केशोराम प्रभाकरस्यार्थमिदं लिपीकृतम् लवपुरे — रामकृष्ण —

८८

144